
शुद्धिपत्रम् ।

पृष्ठम्.	पङ्क्तिः	अशुद्धम्.	शुद्धम्.
		प्रस्तावना.	
२	६	यौवनेपि	यौवनेऽपि.
३	३	आद्यन्त	आद्यन्त.
५	२	नवीनं	नवीनप्रायं.
५	२	नवीनपद्य	नवीनप्रायपद्य.
		अलंकारमणिमाला.	
२	२४	क्वाचत्त	क्वचित्त.
११	१२	निमित्तम्	निर्मित्तम्.
१७	८	समस्तवस्तु विषयम्	समस्तवस्तुविषयम्.
१८	१३	चन्द्रिका	चन्द्रिका.
१८	२८	मार्दवामार्दवर्वं	मार्दवामार्दवे.
२७	१२	दृष्टान्तो	दृष्टान्तो.
५४	१५	अवलम्बन	अवलम्बनं.
५७	१४	महार्णवमन्दिरक	महार्णवमन्दिरके.
५८	१९	भाग्यकामन्तु	भाग्यकामस्तु.
६९	६	मध्य	मध्यं.

॥ अलंकारमणिमाला ॥



जामनगरनिवासिना

गोविन्दात्मजमणिशङ्करवैद्यशास्त्रिणा

प्रणीता.

मुद्रापिता च

जामनगरवसन्तमुद्रालये.

विक्रमाब्दाङ्काः १९६४.

आतङ्कनिग्रहवटिका ।

चिरकालानल्पपरिपाकेन [illegible] मनसि [illegible] अस्य [illegible] शरीरमानसानामायासानां [illegible] मूर्छितं [illegible] अद्य [illegible] विद्वांसो [illegible] । [illegible] निर्वेदोपसंहारा [illegible] निमग्नो वा [illegible] प्रादुर्भूता वा [illegible] वटिका । [illegible] समन्वोपलक्षिते [illegible] वटिकाभिरस्मदनभिज्ञमनुभवन्तेव ।

आतङ्कनिग्रहवटिकासु नित्यं निवसद्भिरनल्पैर्गुणैः प्रतिग-
मयमेव प्राप्ता गुणिभ्यस्तादिका सिद्धिरस्मात्सुखेनापि [illegible] प्रयतते,
ज्वरस्यातिसारस्य वा [illegible], [illegible] वा निवारणेन [illegible]
[illegible] हेतुभूतेरन्येषां रोगे [illegible] शरीरस्य मनसश्चाधिकरभागं विर-
चयितुमनिरुद्धप्रभावो [illegible] योगवर्यः । अनेन हेतुसमूहेन
समग्रमनमण्डलमाग्रहेणैव प्रार्थयाम [illegible] यौवनकान्त्याद्यपेक्षायोग-
योगवरः संसेव्यतामिति ॥

मूल्यं–द्वात्रिंशद्वटिकापूरितपात्रस्यैकस्य रूप्यक एकः । प्रेषण-व्यय (पोस्टेज) मद्विधः संपादनीयेणा यथानियमपूचितं पत्रव्यवहारः संधार्यः ।

वैद्यशास्त्री मणिशंकर गोविन्दजी,

आतङ्कनिग्रह औषधालय,

जामनगर–काठियावाड.

पुस्तकमिदमर्प्यते ।

सद्वृत्तिशास्त्रसेवनसद्विद्यादानप्रभावेन ऋषितुल्यतां प्राप्तेभ्यः हृदय **"बालाजी नारायण जोशी"** इतिप्रसिद्धनामभ्यः साहित्यशास्त्रनिपुणेभ्य आङ्ग्लशिक्षणप्रदातृत्वेन ग्रन्थकर्तुः सततगुरुस्य रुपदाधिष्ठातृभ्य· सविनयमुपकारभारमनुस्मरता—

ग्रन्थकर्त्रा.

प्रस्तावना·

परमपवित्रगुणगौरवोपलक्ष्यगृहदेवतेतिविमलप्रतिष्ठया मम जनयैकदा समुच्चारितानीमानि पदानि ममाद्यापि स्मृतिपथारूढानि वर्त्तन्ते ' जन्मसमये तेऽङ्गानि तत्तत्स्थानीयालंकारविनिवेशनविराजितानीव प्रकृत्यैवानुलोमलोमपंक्तिभ्राजितानि सुस्पष्टतरमेव मयोद्दैक्ष्यन्त" इति । अर्थमिममीश्वरेच्छानुकूल्यवति भाविन्यर्थे निबद्धं सम्प्रधारयामो न वेत्येतत आस्तां तथाप्यवश्यमेवैतदङ्गीक्रियते यदहमलंकारप्रियोऽस्मीत्यत' शरीरमलंकुर्वन्तोऽनिर्वचनीयां दीप्तिमावहन्तो वचसि मनसि च सन्तोषहर्षामृतवर्षं वर्षन्तः पर्षदर्हतामर्पयन्तोऽर्थमप्यत्त्यैव सम्भवन्तोऽलङ्कारा मम परमादरपात्राण्यभूवन् । अत एवालंकारविचारप्रवृत्त्यां पण्डिताग्रेसरोऽग्रजो मे सोदरः **कालिदासशास्त्री** ममोपरि बहुकृतः पर्यतोतोषीत् । शास्त्रीयार्थचर्चावसरेऽप्यलंकारप्रियतयाऽलङ्कारविषयचर्चावानेकैश्चतुरसाक्षरमणैः सहासकृदमरन्मो। सार्वभौमाङ्ग्लभाषाभ्यासमुच्चकक्षारूढमपि यत्त्यक्तवानहं

तत्राप्यलङ्कारप्रियत्वैव हेतुः । हेतुनानेन देवभाषाभ्याममस्याभिअत्र सर्वदा सर्वभावेन साहित्यविषयेषु तत्राप्यलङ्कारविषयेषु विशेषेण कृतर हमत एव गुर्जरमहाराष्ट्रभाषयोराविष्कृते मत्वर्णानि मुक्ताभिवपुलके र्ण वाक्यमुदारमतिहृदयाकर्षणक्षमा मद्लङ्कारा सन्निवेशिताः सुमन सचमत्कारमतिमोदमावहन्ति ॥

अलङ्कारप्रियतयैव सुवर्णघटितालङ्कारैर्यथामभवं परितोष्यन्ते म ऽप्यत्यवर्गो वधूवर्गश्च । "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता इति मनुवचनस्य पाटीरपङ्कसुमनोभिः स्त्रीणामर्चने न मवणत्वमपि तु प्रि वचोभिर्वस्त्रालङ्कारादिभिश्च तासां सत्कारकरणे सन्तोषापादने च तात्प मभिजानता मया स्वकुटुम्बेऽलङ्कारवितरणं क्रियते नतु न किमप्युदा चरितचेतश्चमत्कारकारणमतो मदीयदेशनिवासिबन्धुभ्योऽपि यदलङ्क वितरणं मया क्रियेत तदा तदेव किमपि मे मनःसन्तोषहेतुभूतं भवेद तु विपुलवित्तव्ययसाध्य सुवर्णघटितालङ्कारार्पणं तेभ्यः कर्तुमनीश हमितरेऽपि च । अलङ्काराश्च तेऽर्जनरक्षणधारणादिषु क्लेशचिन्ताभयप्र सहृदयानां नातीव हर्षहेतवो भवन्त्यनेनैव हेतुना वित्तव्ययापेक्षाविरहव सुवर्णघटितालङ्कारांस्तु विबुधानां कण्ठेष्वर्पयितुमसङ्कोच एव मादृशाम नित्यमर्जनरक्षणधारणादिष्वप्यधिकधैर्ययशःशान्तिसन्तोषसत्कारप्रदा सुमनसां वृत्तिविकाशविधायकाश्च इति विचिन्त्य समर्प्यतेऽलङ्कारमणिम लेयं साहित्यशास्त्रविज्ञेभ्यः साहित्यशास्त्रपरिशीलनपरायणेभ्यश्छात्रेभ्यश्च

पुस्तकमिदं बहुपरिश्रममाप्य "बी ए" इतिसंज्ञकोपपदप्राप् विश्वविद्यालये द्वितीयां विबुधभाषामुपलक्ष्यशास्त्राभ्यासकर्तॄणां विशेषेणोपयो स्यादित्यनेन हेतुना व्यरचि तस्मादेवात्र मनोयत्नवृद्ध्यै तत्रत्याभ्यासानुमू त्वेन नर्वितचर्वणत्वाप्राप्त्यै च काव्यप्रकाशीयोदाहरणपद्यानि नोट्टंकितानि किन्त्वन्यग्रन्थेभ्यः संगृहीतानि तथापि यत्र काव्यप्रकाशीयलक्षणानुगुण

मन्यदुदाहरणं स्वल्पायासेन नोपलब्धं तत्र काव्यप्रकाशीयोदाहरणसमानार्थं नवीनं पद्यमलेखि। अनेनपद्यसन्दर्भे हेतुस्तु न कवित्वोद्घाटनमपि त्वसकृद-भ्यस्तकाव्यप्रकाशीयपद्यदर्शनापेक्षयाऽस्मदीयपद्यदर्शनेन दृढतरो भवेत्का-व्यप्रकाशीयलक्षणस्वरूपानुभव इत्यस्मादिच्छैव हेतुः ॥

मुनिगगननन्दचन्द्र (१९०७) परिमिते क्रिस्ताब्दे मोहमयीवि-श्वविद्यालयेऽधीयत आयत्यां च 'बी. ए.' इतिसंज्ञकपरीक्षोत्तीर्णस्य तदन्वपि 'एम्. ए.' इतिप्रसिद्धपरीक्षोत्तीर्णयोः क्रमागतशास्त्रिपदमाह्यै वैयाकरणसि-द्धान्तकौमुदीव्याकरणमहाभाष्यादिग्रन्थान्मद्व्याख्यानमपठतस्तनुजस्य मे शंकरलालनाम्नः 'बी. ए.' इतिपरीक्षाभ्यासकालीनालंकारशास्त्रपरिचय-सौकर्याय संदब्धमिदं पुस्तकमन्येष्वपि विश्वविद्यालयेषु विद्यार्जनं प्रकुर्वद्भ्यो विनामूल्यग्रहणमेव प्रेष्यते प्रशस्तिपूर्वकं परीक्षोत्तीर्णतासादकम्। तेषां गीर्वाणवाणीपरिचयवृद्धिमभीप्सता मयास्यालंकारप्रकरणस्य विवरणमप्ये-तस्यामेव प्रणीतं गीर्वाणवाण्यामुदाहरणपद्यान्यपि बाहुल्येन ग्रन्थान्त-रेभ्य समुद्धृतानि विशिष्टव्युत्पत्तिसमुदायायैतेषामिति क्षन्तव्यं य-त्किंचित्पुरुषबुद्धिदुर्लभं चेत्स्खलनम्। विद्यावृद्धिनिमित्तेनानेन मे यत्नेन यत्किंचिदप्युदियात्सुकृतं तेन तुष्यत्वीशानः सर्वविद्यानामपि च यथा श्रीजोर्वियोरोग्यदीपोदुक्तादिदानेन परमप्रसिद्धिमाप्ता सिद्धवच-नावलीव सकलाऽस्माकमातङ्कनिग्रहघटिका लोकोपकारकारिणी संवृत्ता तथैव चेयमस्मत्कारप्रतिभावृद्धिहेतुभूतयमलंकारमणिमालापि सरस्वत्यर्चनं विकीर्षतां बालानामुपकृत्यै विदुषां विनोदाय च भूयादस्यैव करुणया विश्वमहावृक्षबीजभूतस्येत्याशासे ॥ मर्हीभूतः

श्रीजामनगरवास्तव्यो,

गोविन्दतनुजन्मा वैद्यशास्त्री मणिशंकरशर्मा.

अलंकारमणिमाला.

मङ्गलाचरणम्.

स्रग्धरा.

कल्याणं वो विधत्तां शरणगतजनानन्दसौभाग्यलक्ष्मी–
राचालज्येष्ठसेव्याऽनुपमितपुरुषार्थाविधायाऽनवद्या ॥
सावधाऽनेकरौद्रोद्भवगददनिगडातंकनिर्माहिका सा ।
शारीराऽमेयवीर्याशनिरमरमणिमोद्गताऽऽरोग्यशक्तिः ॥ १ ॥

अनुष्टुप्.

आतङ्कनिग्रहप्राश्रयोऽज्ञानारमतां विदाम् ॥
अर्प्यते कण्ठहृदयेऽलंकारमणिमालिका ॥ २ ॥





॥ अलंकारमणिमाला. ॥

१ उपमा.


सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ ॥
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले ॥१॥
मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः ॥
चकितमृगलोचनाभ्यां सदृशी चपले च लोचने
तस्याः ॥ २ ॥

(साहित्यदर्पणम्.)

हे बाले! तव मुखस्य वदनस्य सौरभं कमलवत्। स्तनौ कुम्भाविव पीनौ। यथा शारदेन्दुस्तथा ते वदनं हृदयं हर्षयति ॥

अधरः अमृतवन्मधुरः पाणिः पल्लवतुल्योऽतिकोमलः तस्या नायिकाया लोचने चकितमृगनेत्राभ्यां समाने चपले च ॥

अनयोः पूर्णोपमालंकारः तथार्थालंकारलक्षणं काव्यप्रकाशे–



" साधर्म्यमुपमा भेदे पूर्णा लुप्ता च सादिमा ।
श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा ॥ "

" भेदे सति समानधर्मसंबन्ध उपमा " अनन्वयेऽतिव्याप्तिवारणाय भेदपदम् । उपमानोपमेययोरविशेषणे कार्यकारणादिष्वतिव्याप्तिवारणाय साधर्म्यपदम् । धर्मपदं स्पष्टम् । उपमेति लक्ष्यम् । सा पूर्णा लुप्ता चेति द्विधा । तत्र पूर्णा उपमानोपमेयसाधारणधर्मवाचकशब्दानामुपादानवती वाक्यसमासतद्धितेषु प्रत्येकं श्रौत्यार्थीभ्यां द्विविधत्वेन षट्प्रकारा । तत्र अम्भोरुहादिति तद्धितगा श्रौती । तुल्यार्थकेति " इवेन समासो विभक्त्यलोपश्च " इति वार्त्तिकेन समासात् समासगा श्रौती । यथा शारदेन्दुस्तथा वदनं कर्तृ हृदयं दर्पयतीति वाक्यगा श्रौती । अन्वयेनोपमानानन्तरप्रयुक्तयथेवादिशब्दा गङ्गसादृश्यैव श्रुतिमात्रेणोपमानोपमेयगतसामान्यलक्षणं सम्बन्धं ज्ञापयन्तीति श्रौती ॥ 'मधुरं मुखाम्बुजम्' अत्र तद्धितगार्थी । ' पल्लवतुल्यं ' अत्र समासगार्थी । चकितेति वाक्यगार्थी । तुल्यादिपदोपादाने तदर्थपर्यालोचनादाने समासे च आर्थस्य साम्यस्य सत्त्वादार्थी उपमा । सर्वेष्वपि चतुर्णामुपादानम् । प्रथमोपादानमर्थालंकाराणां शब्दालंकारापेक्षया प्राधान्यादर्थस्य शब्दयोगात् । शब्दाश्च वर्णसमुदायरूपास्तत्र वर्णा अर्थवन्तोऽनर्थवन्त इति विचारे " अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात् " इणगमावित्यादीनां धातूनामकारो वासुदेव इत्यादीनां प्रातिपदिकानामजादीनां प्रत्ययानामिकारादीनां च निपातानामेकवर्णानामपि तत्तदर्थदर्शनाद्वर्णा अर्थवन्त इति मन्यामहे । " वर्णव्यत्यये चार्थान्तरगमनात् " यूपः कूप इत्यादौ यकारापाये ककारोपजनने चाऽर्थान्तरगतेरपि वर्णा अर्थवन्तः इत्यादि समग्रं भगवता कात्यायनेन तथा तत्स्थानेऽपि भगवता महाभाष्यकारेण च निरूपितं प्रत्याहाराह्निके अनर्थं कश्चिदेकवर्णः काचवे

मालोपमायोऽर्थवत् यथाक्रमं तौ सर्वेषु वर्णेषु प्रतिवर्णं माहि-
त्यदर्पणसंज्ञायां स्पष्टमिति निर्दिष्टेय ॥

मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये ! ।
वाचः सुधा इवोष्ठस्ते बिम्बतुल्यो मनोऽश्मवत् ॥१॥
तस्या मुखेन सदृशं रम्यं नास्ते न वा नयनतुल्यम् ॥

(साहित्यदर्पणम्)

अर्थो यथा । अथ लुप्तोपमा । तत्र साधारणधर्मवाचकोपमानोपमेयानामेकस्य द्वयोस्त्रयाणां वा लोपेन लुप्तोपमा । तल्लक्षणन्तु काव्यप्रकाशे "तद्धर्मस्य लोपे स्यान्न श्रौती तद्धिते पुनः" गुणक्रियारूपस्य साधारणधर्मस्य लोपेऽनुपादाने इवादीनां यथाशब्दमुपादाने च तद्वत् श्रौत्यार्थ्यौ पूर्णोपमावद्वाक्यसमासगाभिन्नत्वेन धर्मलुप्ता उपमा भवति । लुप्तोपमायां धर्मलोपे तद्धितगा श्रौती न स्यात् इति विशेषात् पञ्चप्रकारा धर्मलुप्ता । धर्मलुप्ता च निर्दिष्टसम्बन्धबोधिकायाः षष्ठ्याः सप्तम्या वाऽभावेन ततो विहिते इवार्थे वतिर्विधीयते । अतस्तद्धितान्तरे कल्पबादौ न श्रौतीसंभवः ॥ उदाहरणं हे प्रिये ! यथा इन्दुस्तथा तव मुखम् । अत्रेन्दुरुपमानं मुखमुपमेयं वाचकश्च यथाशब्दः, आह्लादकत्वं साधारणो धर्मस्तल्लोपस्तच्चिह्नक । इयं वाक्यगा श्रौती धर्मलुप्तोपमा । तव हस्तः पल्लवेन समस्तुल्यः । अत्र उपमानादि त्रयं स्पष्टं मार्दवं साधारणधर्मो लुप्तः समशब्दोपादानात् आर्थी वाक्यगा धर्मलुप्तोपमा । वाचः सुधा इवेत्यत्र मधुरत्वं साधारणधर्मो लुप्तः । सुधाशब्देन सहेवशब्दस्य समासात्समासगा श्रौती धर्मलुप्तोपमा । ते ओष्ठः बिम्बफलेन तुल्यः । अत्र रक्तत्वरूपसाधारणधर्मलोपः । तुल्यशब्दोपादानसमासाभ्यां समासगा आर्थी धर्मलुप्तोपमा । ते मनः पाषाणवत् । अत्र

कठोरत्वं साधारणधर्मो लुप्तः । तद्धितगा आर्थी धर्मलुप्तोपमा । तद्धितगा श्रौती धर्मलुप्तोपमा तु न संभवतीति प्रागेवोक्तमतः पञ्चविधैव धर्मलुप्तोपमा ॥

अथोपमानलुप्ता द्विविधा । उदाहरणम् । तस्या मुखेन समानं रम्यं वस्त्वन्तरं नास्ति तथैव तस्या नेत्रतुल्यमपि मनोहरं वस्तु नास्ति इति क्रमेण उपमानलोपे वाक्यगोपमानलुप्ता समासगोपमानलुप्ता चोपमा । तदुक्तं काव्यप्रकाशे—" उपमानाऽनुपादाने वाक्यगाऽथ समासगा " लुप्तोपमायामेच्छिन्नोपमानलोपे वाक्यगा समासगेति द्विविधा उपमानलुप्ता उपमा भवति । उपमानाऽनुपादानं नाम यत्प्रकारकशब्देनोपमानस्योपादाने तदुत्तरवर्तिनेवाद्विनोपमानता प्रत्याययितुं शक्यते तत्प्रकारकशब्देनोपमानाऽनुपादानम् । उदाहरणे मुखमुपमेयं, रम्यत्वं साधारणधर्मः, सदृशश्च वाचकः, तथैव नयनमुपमेयं, रम्यत्वं साधारणधर्मः, तुल्यश्च वाचकः । उपमानं तु नास्ति । इति उपमानलोपे द्विविधा ॥

वदनं मृगशावाक्ष्याः सुधाकरमनोहरम् ॥

(साहित्यदर्पणम्.)

अत्र मृगबालनेत्रसमाननेत्रायाः स्त्रिया मुखं चन्द्रवन्मनोहरमिति सुधाकरशब्दस्य " उपमानानि सामान्यवचनैः २।१।५५ " इतिपाणिनीयसूत्रेण मनोहरशब्देन समासे ' उक्तार्थानामप्रयोग ' इति इवशब्दलोपे च समासगा वाचकलुप्तोपमा । तथा—

अन्तःपुरीयसि रणेषु सुतीयसि त्वं
पौरंजनं तव सदा रमणीयते श्रीः ।

दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्द्र-
सञ्चारमत्र भुवि सञ्चरसि क्षितीश ॥
(साहित्यदर्पणम्.)

अत्र सर्वा उपमा । हे राजन् ! त्वं समरेषु यथा अन्तःपुरेषु तथा चरसि इति "अधिकरणाच्चेति वक्तव्यम्" इत्यनेन वार्तिकेनान्तःपुर-शब्दादाधारमन्तःपुरान्तात्क्यच् वाचकस्येवशब्दस्य लोप इति आधारक्यचि वाचकलुप्तोदाहरणम् । अथैव त्वं पौर जन सुतवदाचरसि पुत्रबुद्ध्या पश्यसीति भावः । अत्र कर्मविभक्त्यन्तात्पुत्रशब्दादुपमानभूतात् "उपमाना-दाचारे,३।१।१०" इतिसूत्रेण क्यच् । इवशब्दस्य लोप इति कर्म क्यचि वाचकलुप्तोदाहरणम् । तथा तव संगरे रमणीयायति तत्राधी-निमित्त । अत्र रमणीशब्दात् "कर्तुः क्यङ् सलोपश्च ३।१।११॥" इतिसूत्रेण कर्तरि क्यङ्प्रत्ययः "अनुदात्तङित आत्मनेपदम्"—मिति-ङित्त्वात्तङ्, इवशब्दलोपेन कर्तृक्यङि वाचकलुप्तोदाहरणमिदम् । तथा त्वं प्रियाभिः अमृतद्युतिरिन्द्र इव दृष्टः । अत्र कर्मणि उपपदे णमु-ल्प्रत्ययः । अत्र भुवि इन्द्र इव सञ्चरसि इति इन्द्रसञ्चारं सञ्चरसि । अत्र कर्तर्युपपदे णमुल् । उभयत्रापि सर्वेषानुप्रयोगः इवशब्दलोपश्चेति क्रमेण वाचकलुप्तायां कर्मणमुल् कर्तृणमुलश्चोदाहरणे । समासगतेवशब्दलोपोदा-हरणेन सह षट्प्रकारा वाचकलुप्ता । तदुक्तं काव्यप्रकाशे "वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि ॥ कर्मकर्त्रोर्णमुलि एवद्द्विलोपे क्विप्समासगा ॥" उपमावाचकवादिलोपे समासकर्माधारक्यच्कर्तृक्यङ्कर्मणमुल्कर्तृ-णमुल्षु षडुदाहरणानि । द्वयोः साधारणधर्मवाचकयोर्लोपे क्विपा समासगेति द्विविधा । अत्र "अन्तःपुरीयसी" त्यादि धर्मलोपोदाहरणानीति केषांचि-न्मतम् । क्यच्क्यङ्णमुलः साधर्म्यं इवादिस्तु लुप्त इति इवादिलोपस्यैवोदाहर-

णम् । न च [illegible] इति [illegible] अनुगामनत् इति [illegible] ॥

विधुवति मुखाब्जमस्याः

(साहित्यदर्पणम्)

अत्र नायिकाया मुखाब्जं विधुरिवाचरतीति विधुशब्दात् "सर्वप्रातिपदिकेभ्यः क्विप् वा वक्तव्यः" इत्यनेन वार्तिकेन क्विपि "सनाद्यन्ता धातवः । ३।१।३२ ॥" इति सूत्रेण धातुसंज्ञायां विधुवति इति [illegible] । [illegible] क्रियायां [illegible] । तथा मुखमब्जमिवेति [illegible] । पूर्वं मुखस्योपमेय [illegible] [illegible] । तदुक्तं "[illegible]" इति पूर्वमुक्तम् ॥

[illegible] ॥

(साहित्यदर्पणम्)

[illegible]

अगर्निर्विककमालोकयिककम्पार्विलोननः ।
कृताणोदमदीदण्डः स महम्मापूर्धायति ॥

(साहित्यदर्पणम्)

[illegible]

राजते सुमलोचना ॥

[illegible]

[illegible]

[illegible]

वारिणेव सरसी शशिनेव निशीथिनी ।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा ॥

(साहित्यदर्पणम्)

इत्यादौ अभिन्ने धर्मे हारकरूपे साधारणधर्मे,

आह्लादिनी नयनयो रुचिरेन्दवीव
कण्ठे कृतातिशिशिराम्बुजमालिकेव ।
आनन्दिनी हृदि गता रसभावनेव
सा नैव विस्मृतिपथं मम जातु याति ॥

(रसगंगाधरः).

इत्यादौ भिन्ने आनन्दादिरूपे साधारणधर्मे च एकस्यैव बहूपमानग्रहणे **मालोपमा** । तथा–

चन्द्रायते शुक्लरुचापि हंसो
हंसायते चारुगतेन कान्ता ।
कान्तायते स्पर्शसुखेन वारि
वारीयते स्वच्छतया विहायः ॥

(साहित्यदर्पणम्)

इत्यादौ पूर्ववाक्यगतोपमेयस्योत्तरत्रोपमानत्वे **रसनोपमा** च भवति । तथाप्युक्तभेदान्तर्भावादीदृशासंख्यप्रकारसंभवाच्च प्रकाशकारिकायां नोपात्ताः ॥ वृत्तमुपमाव्याख्यानम् ॥



२ अनन्वयः ।

गगनं गगनाकारं सागरः सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ॥
इन्दुरिन्दुरिव श्रीमान् ॥

(कुवलयानन्द)

अत्र गगनादेरुपमानान्तरसम्बन्धाभावे अनन्वयालंकारः । एकस्यैव गगनादेरभेदेऽपि भेदारोपादिवार्योपपत्ति । पूर्वत्र वैपुल्यादेः परत्र च श्रीमत्त्वस्य साधारणधर्मस्योपादानाऽभावभावौ विशेषः । लक्षणन्तु काव्यप्रकाशे—“ उपमानोपमेयत्वे एकस्यैवैकवाक्यगे ॥ अनन्वयः ” एकस्यैवैकवाक्यगे उपमानोपमेयत्वे अनन्वय । एकवाक्यगशब्देन रसनोपमाया व्यावृत्तिस्तस्यां पूर्ववाक्यगतोपमेयस्य परत्रोपादानात् । अत्र सदृशशब्दोपादानस्याऽनुपङ्क्तिकरत्वादनुप्रासे च साक्षात्प्रयोजकत्वाभावानुप्रास इति ॥



३ उपमेयोपमा.

खमिव जलं जलमिव खं
हंस इव चन्द्रश्चन्द्र इव हंसः ।
कुमुदाकारास्तारा-
स्ताराकाराणि कुमुदानि ॥

(कुवलयानन्दः)

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणागुणानुबन्धित्वात्तस्य सप्रसवा इव ॥

(रघुवंशः)

तस्य दिलीपस्य गुणाः परस्परसहचारित्वात्सहोदरा इवासन् । अत्र वाच्योत्प्रेक्षायां कुक्षिगर्भयोर्विभागगुणरूपस्य ससवस्योत्प्रेक्षा । निमित्तं तु गुणः ॥

गङ्गाम्भसि सुरत्राण ! तव निर्याणनिस्वनः ।
स्नातीवारिवधूवर्गगर्भपातनपातकी ॥

(साहित्यदर्पणम्)

अत्र हे राजन् ! तव प्रयाणकालीनवाद्यशब्दः शत्रुस्त्रीगर्भपातनपातकी इति गङ्गाजले तन्मुक्त्यर्थं स्नातीवेतिस्नानक्रियोत्प्रेक्ष्यते । पातकित्वं गुणो निमित्तम् ॥

मुखमेणीदृशो भाति पूर्णचन्द्र इवाऽपरः ॥

(साहित्यदर्पणम्)

अत्र चन्द्र एकव्यक्तित्वात् द्रव्यमुत्प्रेक्षानिमित्त मुखरूपम् । नत्वियमुपमेतिशङ्क्यम् । प्रसिद्धोपमानसद्भाव एव तत्सद्भावात् । न खल्वपरचन्द्र प्रसिद्धिः ॥

कपोलफलकावस्याः कष्टं भूत्वा तथाविधौ ।
अपश्यन्ताविवान्योन्यमीदृक्षां क्षामतां गतौ ॥

(साहित्यदर्पणम्)

अत्र विरहे नायिकाकपोलौ पूर्वं पुष्टावपि तथा कृशौ जातौ यथा नासिकाव्यवधानेनान्योन्यं न पश्यत इति क्रियाया अभावोत्प्रेक्षा । कृशतागमनक्रिया निमित्तम् ॥

तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम् ।
हाराय गुणिने स्थानं न दत्तमिति लज्जया ॥

(साहित्यदर्पणम्)

अत्र स्तनाभ्यां स्थानार्हाय हाराय स्थानमौन्नत्यवशात् दत्तमिति लज्जयेव मुखोद्घाटनं न कृतमिति इवाद्यभावाद्गम्योत्प्रेक्षा प्रतीयमानापरपर्याया ॥

वाच्योत्प्रेक्षायाः षोडशसु भेदेषु विशेषो यथा । द्रव्यं विना जात्यादीनां त्रयाणां प्रत्येकं स्वरूपगत्वेन फलगत्वेन हेतुगत्वेन च द्वादश द्वादश भेदाः । द्रव्यस्य तु स्वरूपगत्वमेवेति चत्वारस्तेन चत्वारिंशद्भेदाः । तत्र "सरस्य विभयस्तम्भ" इति पूर्वोक्ता स्वरूपोत्प्रेक्षा । "सप्रसवा इव" इत्यादयो जातिगुणरूपाश्च ॥

रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः ।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम् ॥

(साहित्यदर्पणम्)

अत्रोरगेभ्यः प्रियकथनक्रिया फलोत्प्रेक्षा ॥

सैषा स्थली यत्र विचिन्वता त्वां
भ्रष्टं मया नूपुरमेकमुर्व्याम् ।

अदृश्यत त्वच्चरणारविन्द-
विश्लेषदुःखादिव बद्धमौनम् ॥

(साहित्यदर्पणम्)

अत्र दुःखरूपो गुणो मौनहेतुत्वेनोत्प्रेक्षित इति हेतूत्प्रेक्षा ॥

वस्त्वादिभेदेषु ये स्वरूपगाः षोडश भेदास्ते निमित्तोपादाना-नुपादानाभ्यां द्वात्रिंशदिति समष्ट्या वाच्योत्प्रेक्षायाः षट्पञ्चाशद्भेदाः । यथा पूर्वोक्ते " स्नातीव " इत्यत्र वान्तिक्रिया निमित्तमनुपात्तम् । " चन्द्र इवापर " इत्यत्र तु तथाविधसौन्दर्यातिशयरूपं निमित्तं नोपात्तम् । हेतुफलोत्प्रेक्षयोस्तु निमित्तोपादानमावश्यकम् । यथा " विश्लेषदुःखादिव " इत्यत्र बद्धमौनत्वं निमित्तम् । " आप्यदातुमिव " इत्यत्र च भूपवेशो निमित्तम् । तयोरनुपादाने वाक्यासामञ्जस्यमेव ॥

प्रतीयमानोत्प्रेक्षायाः षोडशसु भेदेषु प्रत्येकं फलहेतुगन्धम् । यथा " तन्वङ्ग्याः स्तनयुग्मेन " इत्यत्र " लज्जया " इति हेतूत्प्रेक्षितेऽप्यनि-मित्तानुपादानं न सम्भवति । इवाद्यग्रहणे निमित्तानुपादाने च प्रमातुरुत्प्रेक्षाऽज्ञानात् । एवं द्वात्रिंशद्भेदा प्रतीयमानोत्प्रेक्षा पुनश्च पूर्वोक्ता अष्टाशीतिप्रकारा उत्प्रेक्षा प्रस्तुतोऽप्रस्तुताभ्यां द्विविधाऽपि सम्भवत्य विधानत्या उत्प्रेक्षा । " उरः कुङ्कुमबिन्दु " इत्यत्र प्रस्तुतो-क्तिः । प्रभावतीपरिणये प्रद्युम्न - इहहि सम्प्रति प्रविदितलज्जाऽन्धा दयमा तिमिरपटलेन-

घटितामिवाञ्जनपुञ्जैः पूरितामिव मृगमदक्षोदैः ।
ततमिव तमालतरुभिर्वृतामिव नीलांशुकैर्भुवनम् ॥

अत्र पद्ये प्रस्तुतोत्प्रेक्षा प्रोक्ता । तथा-

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ॥

अत्रापि प्रकृततमोव्यापनरूप उत्प्रेक्षाधारो विषयो नोपात्तो यथासंख्यं चातिबहुलत्वं धारारूपेणाधःसंयोगश्च निमित्तम् । केचित्तु अलेपनकर्त्रपि तमो लेपनकर्तृत्वेनोत्प्रेक्षितं व्यापनं च निमित्तमेवं नभसोऽपि वर्षणक्रियाकर्तृत्वेनेतिप्रक्षेपः ॥ इयमुत्प्रेक्षाऽलङ्कारान्तरोत्था चेदधिकचमत्कारवती । यथा—

अश्रुच्छलेन सुदृशो हुतपावकधूमकलुषाक्ष्याः ।
अप्राप्य मानमङ्गे विगलति लावण्यवारिपूर इव ॥

(साहित्यदर्पणम्)

अत्राश्रुजलापह्नवेन लावण्यवारिपूरस्योत्प्रेक्षा सापह्नवा । मन्ये शङ्के ध्रुवं प्रायो नूनमिवाद्या उत्प्रेक्षावाचकाः । अन्यदन्यतोवसेयमित्युत्प्रेक्षालङ्कारः ॥



५ सन्देहः ।

अशनिरयमसौ कुतो निरभ्रे
शितशरवर्षमसत्तदप्यशार्ङ्गम् ।
इति मदनवशो मुहुः शशाङ्के
रघुतनयो न च निश्चिकाय चन्द्रम् ॥

(भट्टिकाव्यम्)



६ संशयः ।

जीवनग्रहणे नम्रा गृहीत्वा पुनरुन्नताः ।
किं कनिष्ठाः किमु ज्येष्ठा घटीयन्त्रस्य दुर्जनाः ॥
(कुवलयानन्दः)

कामार्तस्य रामस्य चन्द्रबिम्बे भ्रान्त्यजनकत्वेन तत्त्वाप्रतीतौ अज्ञानिशिनशरवर्षयोर्व्यावर्तकाभ्यां निरभ्रत्वाशार्ङ्गत्वाभ्यां भेदप्रतिपादनेन शब्दानिश्चये सन्देहालङ्कारः ॥

जीवनग्रहणे प्राणहरणे धनहरणे वा पानीयग्रहणे च नम्रा ग्रहणानन्तरं पुनरुन्नता तत्र घटीयन्त्रस्य ज्येष्ठा वा कनिष्ठा वेति न निर्णयः ॥

अत्र खलघटीयन्त्रयोर्व्यावर्तकधर्मानुक्त्याऽभेदेन संशयालंकारो यद्यपि सन्देहोदाहरणं नव तथापि लक्षणसमन्वयात्संशये न बाधः । तदुक्तं काव्यप्रकाशे—"स सन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः" संशयानन्तरं तत्पार्थक्यधर्मोक्तौ सन्देहस्तथ्यावर्तकधर्मानुक्तौ तु संशयः । अयं सन्देहो निश्चयगर्भो निश्चयान्तश्चेति द्विविधस्तथापि निश्चयगर्भत्वमप्रतीयमान निश्चयाभावात्मसन्देहनिरूपालंकारभूमिर्नास्तीति कृत्वा शब्दोपात्तनिश्चयान्त सन्देहो भट्टोद्भटाचार्येणोपेक्षित । यथा—

किं चन्द्रोयं कलङ्कः क च कजमथवा कुत्र
यातं पयस्तत्
संकल्पैरित्यनल्पैर्बहुसमयहरैर्निश्चितं नो पुरस्त

पश्चाल्लालित्यवद्भिर्निजजनहृदयाकर्षकैर्वाग्विलासै-
रेतद्रामास्यमित्थं मृगशिशुनयने निश्चितं तत्त्वदृष्ट्या ॥

(इदं मम)

किमयं चन्द्रः ? चन्द्रश्चेत्कलङ्कः क गतः ? अथवा किं कनकमयं ? नचेत्तर्हि मृदुत्वं क यातम् ? एवमनिसमग्रशेषकैर्वहुभिः संकल्पै-
र्यवनतो न निर्णीतं तत्र सौन्दर्यगुणैः स्वीयाचित्ताकर्षकैर्वाणीविलासैरिदं रामस्य मुखमेवा मुखमिति भो हरिणशावनेत्रे ! याथार्थ्येन सिद्धान्तितम् ॥

अत्र निश्चयशब्दग्रहणेन चमत्कारित्वाभाव । मुखे चन्द्रवुध्यनन्तरं कलङ्काभावेन न चन्द्र इति भेदोक्तिरपेत्र कनकवुध्यनन्तरं मृदुत्वेन भेदोक्ति ।



७ रूपकम् ।

अगाकन्दरलीनदाम्रसर्पः
पृथुरत्नःस्थलकर्कशोरुभित्तिः ।
स्फुरदोणिमयकधातुरागः
शुशुभे वानरभूधरस्तदानीं ॥

(भट्टिकाव्य)

दारापत्यसुहृद्भिः पूर्णा गाम्भा विश्वमारम् ।
कोऽपि नैष्ठिकतमानः केनै चीयते ॥

(साहित्यदर्पण)

अत्र सीतापि रामसुद्रिकां दत्त्वा लङ्कां दग्ध्वा राक्षसैर्युद्धं कृत्वा दासाभिमर्दितमातङ्गतो हनूमतो वर्णितं वानररूपो भूधर पर्वत, शुशुभे इत्यन्वय । कथंभूत ' मणरूपगुहासु सीता दासरूपा सर्वा यत्र, विद्रुमदरारूपकण्ठा कठिना उरुभित्तयो यत्र, निर्झरशिरस्पो यद्वा रैरवाद्रिपञ्जुरागो धैर्यतारदा । अत्र वानरं हनुमति उपमेये उपमानरूपभूधरस्यारोपणप्रदनात् तद्गतानां सर्वेषां चन्द्रादीनां मणादिषुतारोपात् समस्तवस्तुविषयो रूपकालङ्कार । तदुक्तं काव्यप्रकाशे–" तद्रूपकमभेदो य उपमानोपमेययो ॥ समस्तवस्तु विषयं श्रौता आरोपिता यदा " उपमानोपमेययोरतिसाम्यादनपह्नुतभेदयोरभेदे निर्दिष्टे रूपकालङ्कारस्तत्र यदा आरोपविषयोपमेयवाचकशब्दस्योपमानस्यापि शाब्दं तदा समस्तवस्तुविषयं रूपकम् । बहुवचनमविवक्षितं यारिकायाम् ॥

अन्या नायिकायाः पादपद्मस्पर्शमुपि पूर्णं विकसर मुखं वैलोक्यलोचनरूपाक्षरसमपूर्तेन पीयते ' अरि नु सर्वं पीयते । अत्र लावण्ये मधुनो लोकलोचनेषु च षट्पदत्वस्याभिनादारोप शाब्दो मुखे पद्मत्वारोपस्त्वार्थ इति कश्चिदारोप्यमाण शाब्दोपास्त काश्चिदार्थसामर्थ्यलभ्य अत एकदेशविवर्तनादेकदेशविवर्ति रूपकम् । उक्तं च काव्यप्रकाशे– " श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत् " ते आरोप्यमाणा यत्र केचिच्छब्दोपात्ताः केचिदर्थसामर्थ्यलभ्यास्तद्रूपकमेकदेशविवर्ति । अत्रापि बहुवचनमविवक्षितम् ॥

दासे कृतागसि भवत्युचितः प््रभूणां
पादप्रहार इति सुन्दरि नात्र दूये ।
उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रै-
र्यत्खिद्यते मृदुपदं ननु सा व्यथा मे ॥

निर्माणकौशलं धातुश्चन्द्रिका लोकचक्षुषाम् ।
क्रीडागृहमनङ्गस्य सेयमिन्दीवरेक्षणा ॥

(साहित्यदर्पणम्)

पादप्रहारकर्त्रीं नायिकां प्रति नायको वक्ति । हे सुन्दरि ! किङ्करे सापराधे सति प्रभूणां पादप्रहारो योग्य इति मच्छरीरे त्वया कृतेऽपि तस्मिन्न दुःखं मम दुःखन्त्वपरं यत्तव स्पर्शजनिताः कठोरपुलकाङ्कुरा एव कण्टकाग्राणि तैर्मदिवत्तव पद विद्धं भवतीति । अत्र पुलकाङ्कुररूपेऽङ्गिनि केवल कण्टकाग्रारोपादितरेषामङ्गानामनुपादानान्निरङ्गं समस्तवस्तुविषयं रूपकमिदं शुद्धमेकदेशविवर्तिनो निरङ्गस्य शुद्धस्योदाहरणं तु " गुणसिन्धु " इत्यादिकं बोध्यम् यतोऽत्र विवक्षिते पुरुषे सिन्ध्वारोपः श्रौतो गुणेषु जलारोपस्त्वार्थ इति ॥

प्रकृतेयमिन्दीवरनेत्रा स्त्री विधातुर्निर्मितिकौशलरूपा जननेत्राणां चन्द्रिकारूपा कामस्य च क्रीडामन्दिररूपेत्यत्र मालोपमायामिवैकस्यां युवत्यामनेकरूपत्वमारोपितमिति मालारूपकमिदम् । उक्तञ्च काव्यप्रकाशे " साङ्गमेतन्निरङ्गन्तु शुद्धं माला तु पूर्ववत् " एतदुक्तद्विभेदं सावयवत्वेन साङ्गं निरङ्गन्तु शुद्धमङ्गारोपाभावात् केवलमङ्गिन एवारोपात् । व्रणकन्दरेति दासे इति च उदाहरणद्वयमप्यारोपितानां श्रौतत्वेन समस्तवस्तुविषयकमेवेति बोध्यम् । साङ्गत्वनिरङ्गत्वाभ्यां तस्यैव च भेदद्वयमिदम् ॥

कमलावासकासारः क्षमाधृतिफणीश्वरः ।
अयं कुवलयस्येन्दुरानन्दयति मानवान् ॥
प्राचीसन्ध्यासमुद्यन्महिमदिनमणे–

— मौनमाणिक्यकान्ति–

ज्वालामाला कराला कवलितजगतः
क्रोधकालानलस्य ।
आज्ञाकान्तापदाम्भोरुहतलविगलन्-
मञ्जुलाक्षारसाभा
क्षोणीन्दो सङ्गरे ते लसति नयनयो-
रुद्भटा शोणिमश्रीः ॥

(रसगङ्गाधर).

कमलानामावास एव कमलाया लक्ष्म्या वास । क्षमाया. पृथिव्या धारणमेव क्षमायाः क्षान्तेर्धारणम् । कोः पृथिव्या वलयस्यैव कुवलयस्य कुमुदस्य । अत्र कमलाया वासे श्लेषमहिम्ना कमलानामावासारोपो राशि कासारारोपे उपाय एवमितरत्राप्यारोपबोधाद्राशि कासाराद्यनेकपदार्थारोपरूपत्वाच्च श्लिष्टपरम्परितमालारूपकालंकार. ॥

हे पृथ्वीचन्द्र राजन्! संग्रामे तव नेत्रयोरुद्भटा शोणिम्नो लक्ष्मी. शोभते । कथंभूता? उदयं गच्छतो महिमसूर्यस्य प्राचीसन्ध्यारूपा । मानरूपमाणिक्यस्य कान्तिरूपा । जगद्भक्षकक्रोधकालाग्नेर्भयंकरज्वालामालारूपा । आज्ञारूपकान्ताचरणकमलतलात्प्रस्रवन्मनोहरलाक्षारसकान्तिरूपा च । अत्र राजमहिम्नि सूर्यारोपो नेत्रशोणिमश्रियां प्राचीसन्ध्यारोपे कारणम् । क्रोधे कालाग्न्यारोपो नेत्रशोणिमश्रियि ज्वालामालारोपनिमित्तम् । आज्ञायां कान्तारोपो नेत्रशोणिमलक्ष्म्यां चरणलाक्षारसाभारोपे उपाय इत्यश्लिष्टपरम्परितमालारूपकम् । लक्षणं काव्यप्रकाशे—" नियतारोपणोपायः स्यादारोपः परस्य य ॥ तत्परम्परितं श्लिष्टे वाचके भेदभाजि वा ॥" यः परस्याप्रकृतस्यारोपो नियतारपर्यायस्य प्रकृतस्यारोपोपायमाध्यस्त

रम्परितरूपकं द्विविधं श्लिष्टमश्लिष्टञ्च । यद्यपि श्लिष्टपरम्परितरूपकं न केवलोऽर्थालंकारः किन्तु शब्दार्थालंकारस्तथापि प्रसिद्धेरुक्तः ॥

आहवे जगदुद्दण्डराजमण्डलराहवे ।
श्रीनृसिंहमहीपाल ! स्वस्त्यस्तु तव बाहवे ॥
पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः ।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः ॥

(साहित्यदर्पणम्).

जगति उत्कृष्टराजमण्डले विरोधित्वेन राहुरूपाय तव बाहवे हे नृसिंहनृप ! स्वस्ति स्तात् । अत्र राजमण्डले श्लेषेण चन्द्रमण्डलारोपो नृपबाहौ राहुत्वारोपे निमित्तमितिश्लिष्टपरम्परितकेवलरूपकम् ॥

वो युष्मांश्चत्वारो हरिबाहवः संरक्षन्तु । कथंभूताः ? सजलमेघवच्छ्यामाः । जलदोपमानेन संरक्षणयोग्यत्वम् । पुनश्च शार्ङ्गनामकधनुर्ज्याघातेन कठोराः । एतद्विशेषणमपि सङ्गरसामर्थ्यभारसहत्वाभ्यां संरक्षणयोग्यत्वसूचकम् । पुनश्च त्रैलोक्यरूपमण्डपस्य स्तम्भरूपा एतदपि तादृगेव । अत्र त्रैलोक्ये मण्डपत्वारोपो हरिबाहुषु स्तम्भत्वारोपे निमित्तमिति अश्लिष्टपरम्परितकेवलरूपकम् ॥

रशनारूपकन्तु वैचित्र्याभावान्नेति नोदाहृतमन्येऽपि रूपकभेदाः कुवलयानन्दकाव्यादर्शकाव्यालङ्कारगङ्गाधरादिषु बहवो दर्शितास्तथापि ग्रन्थभूयस्त्वभिया विरम्यते । दिङ्मात्रं यथा—

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान्बादरायणः ॥

अत्र भगवति व्यासे चतुर्वदनाद्यभावेन न्यूनताद्रूप्यरूपकमिदम् । वामनमते विशेषोक्त्यलंकारोदाहरणम् । एवमधिकताद्रूप्यानुभयताद्रूप्यादयो भेदा ऊह्याः ॥



८ अपह्नुतिः ।

श्यामं सितं च सुदृशो न दृशोः स्वरूपं
किन्तु स्फुटं गरलमेतदथामृतञ्च ।
नो चेत्कथं निपतनादनयोस्तदैव
मोहं मुदं च नितरां दधते युवानः ॥
(रसगङ्गाधरः).

मन्थानभूमिधरमूलशिलासहस्र-
संघट्टनव्रणकिणः स्फुरतीन्दुमध्ये ।
छायामृगः शशक इत्यतिपामरोक्ति-
स्तेषां कथंचिदपि तत्र हि न प्रसक्तिः ॥

शोभननेत्राया नेत्रयोः कृष्णं शुभ्रं चेति द्विविधं यत्स्वरूपं दृश्यते तन्नेत्रस्वरूपं न किन्तु कृष्णं विषं शुभ्रं चामृतमिति व्यक्तम् । न चेदेवं तर्हि तादृशयोर्नयनयोर्निपतने युवानस्तादृशालिनो नराः विषकार्यं मोहममृतकार्यं च हर्षं कथं प्राप्नुवन्ति ? । अत्र नेत्रयोः प्रकृतमुपमेयं स्वाभाविके श्यामत्वे सितत्वे चासत्यं कृत्वा तत्र गरलत्वामृतत्वयोस्तदनुगुणकार्यदर्शनमुखेन स्थापनादपह्नुतिरलङ्कारः ॥

उत्पत्तिकालीनं यन्मन्थानगिरिमूलगतशिलासहस्राणां संघट्टनं तेन यो मृगाङ्कः स एव चन्द्रबिम्बे दृश्यते । पामरास्तु तत्र छायेति मृग इति शशक इति वदन्ति तदसत्यं यतस्तेषां चन्द्रे प्राप्तिरेव न सम्भवतीति पर्वतसंघट्टनाङ्क एव सत्यः । अत्रापि प्रकृतच्छायामृगशशकादिकं यथेच्छं पामरोक्त्याऽप्रमत्तया च निषिध्य पर्वतसंघट्टनाङ्कस्थापनादपह्नुतिः । तदुक्तं काव्यप्रकाशे—" प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः ॥ " प्रकृतमुपमेयं निषिध्यान्यदप्रकृतमुपमानं सत्यत्वेन स्थाप्यते इयमपह्नुतिरत्र यच्छब्देन नपुंसकेनोद्दिष्टस्य सेति स्त्रीलिङ्गेन परामर्शे विरोधेऽपि " उद्दिश्यमानप्रतिनिर्दिश्यमानयोरेकत्वमापादयन्ति सर्वनामानि पर्यायेण तल्लिङ्गमुपाददत " इति व्याकरणमहाभाष्यपस्पशाह्निकव्याख्याने कैयटोक्तेर्निरवद्यम् । अस्या हेत्वपह्नुतिपर्यस्तापह्नुतिभ्रान्तापह्नुतिच्छेकापह्नुतिकैतवापह्नुतिसावयवापह्नुतिनिरवयवापह्नुतिशब्दवाच्या नेहोक्ता भेदा ग्रन्थान्तरेषु दर्शिता अभ्यूह्याः ॥



९ श्लेषः ।

कस्कलितचक्रघटनो नित्यं पीताम्बरस्तमोरातिः ।
निजसेविजाड्यनाशनचतुरो हरिरस्तु भूतये
भवताम् ॥
सम्भूत्यर्थं सकलजगतो विष्णुनाभिप्रपन्नं
पद्मालं स त्रिभुवनगुरुर्वेदनाथो विरिञ्चिः ।

ध्येयं धन्यालिभिरनिलजं स्वप्रकाशस्वरूपं
पद्मास्यं नरविभमपि ज्वलितं वस्तु वस्तुष्टयेऽस्तु ॥

(अस्मद्गुरोः).

यो हि हरिः दिवसस्य सत्र सूर्योऽपि अर्थं मुदुर्हि कालचक्र च तिष्ठ । दर्शनादि ज्वलनापि कान्त पीत आकाशे स्थित । तथा शाखान्तरस्थ नाद शब्देनार्थितः । द्वितीय नाद भासते पुरो हरिर्विष्णु सूर्यश्च विष्णु भवतो मयूखेऽस्तु । अत्र पर्यायवृत्तिपदयुग्मत्वेन शब्द श्लेषोऽयमपि ज्ञाप्यते । विरोधाभासोऽपि इति विरोधा-भासेन सहितं — "निरर्थकत्वाद्धरणो विष्णु सूर्यश्च पातु ॥" इत्यादौ शब्दार्थयोः श्लिष्टत्वादिन्यास ॥

श्लिष्टपदमर्थस्य कमलयोरिव अनुरागस्य श्लेषत्वेन ब्रह्मपदार्थविषय समाहर्तेव । पद्मगत श्लेष पद्मेषु । विष्णुनाभि स्थानस्य विष्णुना अभिमतत्वं च । त्रिभुवनगुरोर्वेदाधिष्ठाता ब्रह्मापि यस्य नाभ्यन्तरे स्थित एवं नानादर्शि ब्रह्म दर्शनमार्गे नास्ति । ध्यानमार्गे ध्येयं ध्यानार्हं लक्ष्यार्थं च वस्तु युष्माकं तुष्टये भवेदित्यर्थः । लक्षणं काव्यप्रकाशे—"श्लेष स वाक्य एकस्मिन्यत्रा-नेकार्थता भवेत् ।" यत्र एकवाक्ये अनेकार्थत्वं भवेत् स श्लेषालङ्कार इत्यर्थः । अयमर्थश्लेषालङ्कार एव दर्शितः यद्यपि शब्दश्लेषसभङ्गाभङ्गश्लेष-नानाप्रकारभेदा विवादग्रस्ता भेदा अन्यत्र सन्ति । तत्र दिङ्मात्रं दर्श्यते ॥

सभङ्गश्लेष इत्याद्यागेऽभङ्गश्लेषोऽर्थालङ्कार इति केचिदुभय-मपि शब्दालङ्कार इत्यन्ये । उभयमप्यर्थालङ्कार इत्यप्पदीक्षिताः । अत्र "येन नाप्राप्ते य आरभ्यते स तस्य बाधकः ।" इतिन्यायेनोत्सर्गोऽपवादलङ्का-

रान्तरबाधकोऽलङ्कारान्तरासङ्कीर्णविषयत्वाभावादप्रकृतमात्रयोः प्रकृतमात्रयोर्वा तुल्ययोगिता प्रकृताप्रकृतयोर्दीपकमित्यादिकल्पनयेन्दुद्भटाचार्यमतमपरेऽप्याश्रिता इति वदन्तः "पद्मात्प्रियं तत्किमपि ललितं यस्तु वस्तुद्येऽस्तु" इत्यत्र "सर्वदोमाधवः पातु योगङ्गां समदीधरत्" इत्यादौ च न श्लेषातिरिक्तः कोऽप्यलङ्कार इत्यलङ्कारान्तरासङ्कीर्णतामप्यस्याहुस्तेऽप्येतद्विषयक. शास्त्रार्थोऽलंकारसूत्रेभ्योऽवसेयः ॥



१० समासोक्तिः ।

परस्य मर्मविधमुज्झतां निजं
द्विजिह्वतादोषमजिह्मगामिभिः ।
तमिद्धमाराधयितुं सकर्णकैः
कुलैर्न भेजे फणिनां भुजङ्गता ॥

(शिशुपालवधम्).

दीप्तं रावणमाराधयितुं फणिनां कुलैर्भुजङ्गता सर्पता खलपक्षे च विटता न भेजे त्यक्तेत्यर्थः । कथंभूतानां सर्पाणां खलानां च ? यः परममर्मस्थलं कुलाचारव्रतानि च भिनत्ति तं स्वकीयद्विजिह्वतादोषं विषरूपं पिशुनतारूपं च त्यजताम् । कथंभूतैस्तेषां कुलैः ? करचरणादिमच्छरीरधारित्वादन्यप्राकपटचारित्वाच्चाजिह्मगतिकर्तृभिस्तथा चक्षुःश्रवस्त्वं त्यक्त्वाऽविश्रृङ्खलकर्णैरन्यत्र च कर्णयति शृणोतीति कर्णको नियन्ता तत्सहितैः । अत्र परममर्मवित्त्वादिश्लिष्टविशेषणमाहात्म्यादप्रस्तुतसर्पव्यवहारा-

प्रस्तुतसटजनव्यवहारप्रतीतिः समासोक्तिरलङ्कारः । लक्षणं काव्यप्रकाशे—" परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः " । श्लेषवद्भिर्विशेषणैर्न तु विशेष्येणाप्रकृतोक्तिः समासोक्तिरित्यर्थः ॥

११ निदर्शना ।

इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
समिल्लतां छेत्तुमृषिर्व्यवस्यति ॥

(अभिज्ञानशाकुन्तलम्).

न भवति महिमा विना विपत्ते-
रवगमयन्निति पश्यतः पयोधिः ।
अविरतमभवत्क्षणेक्षणेऽसौ
शिखरिपृथुप्रथितप्रशान्तवीचिः ॥

(भट्टिकाव्यम्).

उच्चैः स्थितिं लघुतरः प्रगतोपि पातं
गच्छेत्स शीघ्रमिति संप्रवदञ्जनानाम् ।
शैलाग्रगोपि लघुमारुतवेगनुन्नः
स्थानाद् तृणकण इयर्ति धरासुपृष्ठम् ॥

(इदं मम).

भगवता काश्यपेनाश्रमधर्मनियुक्तां शकुन्तलां दर्शंदर्शं दुष्यन्तो वक्ति । किलेत्यरुचौ । दृश्यमानं स्वाभाविकसुन्दरमिदं शकुन्तलाशरीरं यस्तपःसमर्थं कर्तुमिच्छति स निश्चितं नीलकमलपत्रधारया काष्ठलतां छेत्तुं प्रयतते । अत्र नीलोत्पलपत्रधारया काष्ठच्छेदनमिव शकुन्तलाशरीरेण तपश्चरणमित्युपमायां पर्यवसानमत एव शकुन्तलाशरीरतपश्चरणयोर्वस्तुनोरभवन्सम्बन्ध उपमाकल्पक इतिसमस्तवाक्ये निदर्शनालङ्कारः । तदुक्तं काव्यप्रकाशे—" निदर्शना ॥ अभवन्वस्तुसम्बन्ध उपमापरिकल्पकः ॥ " बाधितोऽन्वयो यत्रोपमापरिकल्पकस्तत्र निदर्शनाऽलंकारः । उपमापरिकल्पनं च कचिल्लक्षणया व्यञ्जनया च कचित् । निदर्शनं दृष्टान्तकरणमस्त्यत्रेति मत्वर्थीयाजन्ताट्टापि निष्पन्ना संज्ञान्वर्था । मालारूपाप्येषा भवति एकस्मिन्नम्नुत्पनेकासंभवद्वस्तुसम्बन्धे ॥

समुद्रस्तीरस्थितरामादीन्तरङ्गान्पश्यतो दृष्ट्वा न क्वापि विपत्तिरहिता सम्पद्धिरिति दर्शयन्नयान्तं गिरिसदृशान्महतो वीचीन्प्रतिक्षणमुच्चैश्चकार प्रशान्तांश्च चकार । अत्रापि स्ववीचिवर्द्धनावर्द्धनक्रियया सम्पद्वर्द्धनावर्द्धनाविशिष्टार्थदर्शनान्निदर्शना ग्रन्थान्तरलक्षणेन ॥

अत्यन्तं यो लघुः स उच्चैःस्थानं प्राप्तोऽपि निश्चितं तत पतेत् ... प्रत्नुत्पाल्हीप्रथिति जनानां स्वव्यवहारेण ब्रुवन् पाषाणकण पर्वताशिखर ... गोऽपि मन्दवातवेगचालित सन् तत्स्थानाद्भुवि पतति । अत्र पात ... च्छेदित्यनेन प्रतिपाद्यस्य पातकार्यस्य लाघवे सत्युच्चैःस्थानलाभरूपस्य ... कारणस्य च कार्यकारणभावान्यः सम्बन्धः पृथ्वीपृष्ठपतनक्रियया प्रति... बोधन इत्यत्र निदर्शना । लक्षणं काव्यप्रकाशे—" स्वस्वहेत्वन्वयस्योक्तिः क्रियैव च सापरा ॥ " यत्र क्रिययैव शब्दव्यवच्छेद्यैतत्कार स्वं कार्... स्वैतु कारणे तयोरन्वयस्य सम्बन्धस्योक्तिरवगतिस्सापरा द्वितीय...

निदर्शना । तथा च स्फुटं गन्तुं तस्याप्यमानता निरवशेषहेतुर्येषां पाषाण-
खण्डेऽपि दृष्टान्ताभिप्रायातिदर्शनार्थत्वात्तत्वं सिद्धमिति संक्षेपः ॥



१२ अप्रस्तुतप्रशंसा ।

गच्छामीति मयोक्तया मृगदृशा निःश्वासमुद्रेकिणं
मुक्त्वा तिर्यगवेक्ष्य बाष्पकलुषेणैकेन मां चक्षुषा ।
अद्य प्रेम मदर्पितं प्रियसखीवृन्दे त्वया बध्यता-
मित्थं स्नेहविवर्द्धितो मृगशिशुः सोत्प्रासमाभाषितः॥

(साहित्यदर्पणम्).

अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः ।
केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ॥

(शिशुपालवधम्).

अत्र विदेशगमननिवृत्तिरूपे कार्ये प्रस्तुतेऽप्रस्तुततत्कारणरूपप्रियाचरणोत्कर्षकथनेनाप्रस्तुतप्रशंसालङ्कारः प्रथमः । कश्चित्प्रियं प्रति गृहेऽप्यागमनकार्ये स्वकीयविदेशागमनकारणं वक्ति । मया विदेशं गच्छामीत्युक्तया मत्कान्तया दीर्घं निःश्वासं मुक्त्वाऽश्रुपूर्णेनैकेनैव चक्षुषा मां तिर्यगवेक्ष्य पालितं क्रीडामृगपोतं मर्तव्यमुक्तं सवेगं हे मृगशिशो ! मयि कृतं प्रेमाद्य मत्सखीसमूहे वस्तव्यं त्वया । पतिवियोगजन्यमरणेन स्वप्रेम्णो मदधिकरणकत्वाभावात् ॥

चन्द्रमसा यद्यपि स्वाङ्के मृग आरोपितस्तथापि मृगलाञ्छन इत्युच्यते । आश्रयदातृत्वेऽपि दूषणत्वमिति भावः । केसरिसिंहेन तु क्रूरतया यद्यपि निहन्यन्ते मृगयूथास्तथापि स मृगाधिपतित्वेन व्यवह्रियते । भक्षकेऽपि रक्षकव्यवहार इति भावः । उभयत्र क्रमेण मार्दवामार्दवत्वे प्रयोजके । अत्र क्रूर एव सत्यपि दोषे गजनिमीलिकया दोषान्तर्धानपूर्वकं ख्यातिभाक् क्रियते जनैर्मृदुस्तु सत्यपि गुणे तत्त्यायेनैव गुणान्तर्धानपूर्वकं दूष्यत इति बलभद्रस्य श्रीकृष्णं प्रति वाक्ये सामान्ये वक्तव्येऽप्रस्तुतचन्द्रसिंहयोर्व्यवहारः कथित इति सामान्ये प्रस्तुते विशेषकथनरूपाऽप्रस्तुतप्रशंसा द्वितीया ॥

पादाहतं यदुत्थाय मूर्द्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥

(साहित्यदर्पणम्).

नितरां परुषा सरोजमाला
न मृणालानि विचारपेशलानि ।
यदि कोमलता तवाङ्गकाना-
मथ का नाम कथापि पल्लवानाम् ॥

(रसगङ्गाधरः).

केनचित्पादाभ्यां पादेन वाऽऽक्रान्तं रजोऽपमानमात्रं कृतमनेनाहमित्यपमानकर्तुरेवोत्थाय मस्तकमारोहति तेन ज्ञायते यदपमाने जातेऽपि स्वस्थात्तत्प्रतिक्रियाऽसमर्थात्प्राणिनोऽप्राण्यपि तत्प्रतिक्रियासमर्थत्वाच्छ्रेष्ठमित्यर्थः । अत्रास्मदपेक्षया रजोऽपि वरमिति विशेषे प्रस्तुते सामान्यतो देहिशब्दोपादानाद्विशेषे प्रस्तुते सामान्यकथनरूपाऽप्रस्तुतप्रशंसा तृतीया ॥

कामिनीगण्डयोर्नायिका प्रशंसति । तथाहि कोपकन्या कपोलौ तर्हि कमलवृन्तिरादत्तं यस्या । कमलनालान्तःपातिवृत्तिरमणीयकोमलता- भाति । अथ पत्तनानां वा कार्याणि ! । अत्र नायिकाङ्गसौन्दर्यनि- रूपणे कार्ये प्रस्तुते पल्लवादिनिष्कारणस्वकार्यकथनेन कारणे प्रस्तुते कार्यवर्णनरूपाऽप्रस्तुतप्रशंसा चतुर्थी । कार्यकारणभावस्तु द्वयोर्ज्ञानयो- रेव । यतो मृणालगतवाक्यतावस्य स्वरूपमन्दाङ्गसौकुमार्यमन्यतोऽपि न कार्यकारणभावहानि ॥

पुरा सरसि मानसे विकचसारसालिस्खलत्
परागसुरभीकृते पयसि यस्य यातं वयः ।
स पल्वलजलेऽधुना मिलदनेकभेकाकुले
मरालकुलनायकः कथय रे कथं वर्त्तताम् ॥
(भामिनीविलासः).

नितरां नीचोऽस्मीति त्वं खेदं कूप मा कदापि कृथाः ॥
अत्यन्तसरसहृदयो यतः परेषां गुणग्रहीतासि ॥
(रसगङ्गाधर.).

कश्चित्कंचिद्वक्ति । यस्य प्रफुल्लितकमलपङ्क्तिसारपरागेण सौ- गन्ध्यमनुकृते मानससरोवरजले पूर्वकालीनावस्था गता स हंसकुलनाय- कोऽधुना मिलद्बहुमण्डूकव्याकुलीकृते पल्वलजलेऽनिभृतमनाः कथं वर्तितुं समर्थो भवेत् ! कथयेति । अत्र हंसतुल्यनामार्थेन कस्यचिद्गु- णवतो जनस्य दैवयोगात्पूर्वस्थानत्यागेऽन्यस्थाने कथं वर्तनमिति प्रतीतेः समासोक्तिभिन्ना केवलतुल्याऽप्रस्तुतप्रशंसा ॥

कश्चित्कूपं वदति । हे कूप! अत्यन्तं नीचोऽस्म्यहमिति खेदं कदाचिदपि मा कुरु । यतोऽतिसरसहृदयत्वपरगुणगृहीतृत्वे खेदाभावहेतू । अत्र कूपपक्षे नीचत्वमधोविवरशालित्वमन्यत्र जात्यादिप्रयुक्तम् । सरसहृदयत्वं सजलमध्यभागविशिष्टत्वमन्यत्र शृङ्गारादिशान्तान्तरसयुक्तचित्तत्वम् । जलार्थिनिक्षिप्तघटग्रीवाविलग्नरज्जुग्रहणकर्तृत्वमन्यत्र तु परेषां सदाचारादिगुणानामुपादेयबुद्ध्या गृहीता । अत्र श्लिष्टविशेषणमाहात्म्यात्कूपतुल्यधेर्मुजनप्रतीतिः समासोक्त्युत्थापिता तुल्येन तुल्यस्तोरूपाऽप्रस्तुतप्रशंसा । एतादृशे विषये जगन्नाथपण्डितास्तु प्रकृतालङ्कारविरुद्धात्मिकात्वेन मानुग्राहिका समासोक्तिरिति श्लिष्टविशेषणोपस्थापितद्वितीयार्थमात्रेण समासोक्तिर्यथाकथंचिदित्याहुः ॥

पुरुषोत्तमेन केनाप्ययमपरो दर्शितः सतां मार्गः ।
नृत्यत्यागाधोगतियाचनकरणेऽपि योद्धरेद्विश्वम् ॥

अथवा ।

दिशियं पुरुषोत्तमेन केनाप्यपरादर्शि यदत्र पुरुषरवात्।
विफलेदपि याचनां प्रकुर्यादध एयादपि विश्व-
मुद्धरेरसः ॥

(इदं मम).

कोकिलोऽहं भवान्काकः समानः कालिमावयोः ।
अन्तरं कथयिष्यन्ति काकलीकोविदाः पुनः ॥

(साहित्यदर्पणम्).

इयमुक्तिः कश्चित्कोकिलः प्रति काकं वदतीत्यनाद्दे मत्कवद्विहितप्रिय । ... [illegible]

[illegible] । अत्र [illegible] अप्रस्तुतप्रशंसा । [illegible] ॥

[illegible] ' इत्यादि [illegible] । [illegible] । [illegible] । अत्र [illegible] । [illegible] विरचिता । तल्लक्षणं तु काव्यप्रकाशे —" अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ॥ कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ॥ तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा ॥" अप्रस्तुतस्य [illegible] प्रस्तुतस्य [illegible] । कार्ये प्रस्तुते तदन्यस्य कारणस्य वचनमित्येवं कारणे प्रस्तुते कार्यस्य, सामान्ये प्रस्तुते विशेषस्य, विशेषे प्रस्तुते सामान्यस्य, तुल्ये प्रस्तुते तुल्यस्य चेत्येवं पञ्चप्रकारोऽस्य तुल्यान्तर्गतभेदद्वयेन तु स-[illegible] ॥

१३ अतिशयोक्तिः ।

कथमुपरि कलापिनः कलापो
विलसति तस्य तलेऽष्टमीन्दुखण्डम् ।
कुवलययुगलं ततो विलोलं
तिलकुसुमं तदधः प्रवालमस्मात् ॥

(साहित्यदर्पणम्).

अन्या जगद्धितमयी वचसः प्रवृत्ति-
रन्यैव कापि रचना वचनावलीनाम् ।
लोकोत्तरा च कृतिराकृतिरार्तहृद्या
विद्यावतां सकलमेव चरित्रमन्यत् ॥

(रसगङ्गाधरः).

पुष्पं प्रवालोपहितं यदि स्यान्
मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्याद्विशदस्य तस्या-
स्ताम्रौष्ठपर्यस्तरुचः स्मितस्य ॥

(कुमारसंभवम्).

मयूरस्य कलापस्य [illegible] कथं विलसति ! [illegible] अर्धचन्द्र[illegible] कथम् ! । [illegible] कथम् ! ।

ततोऽप्यधस्तिलपुष्पमस्याधाधः प्रवालं कथमित्यत्र नायिकायाः केशाधरान्तवर्णने उपमानेन कलापेनोपमेयस्य केशपाशस्य सत्यपि भेदे निगरणादतिशयोक्तिरेवं भालस्यार्द्धचन्द्रेण नेत्रयोः कुवलययुगलेन नासिकायास्तिलपुष्पेण अधरस्य च प्रवालेन निगरणादतिशयोक्तिरभेदात्मिकैका ॥

जगद्धितकरणप्रवणा यस्य प्रवृत्तिरन्या लोकोत्तरा । वचनपद्धक्तिविन्यासोपि तादृशः । लोकोत्तरा क्रिया । पीडितपीडाहरणकर्त्री चाकृतिरिति विदुषां चरित्रं सर्वमलौकिकमित्यर्थः । अत्राभेदेपि भेदप्रतिपादनं लोकोत्तरत्वप्रतिपत्त्यर्थम् । प्रस्तुतस्यान्यत्वकल्पनेनातिशयोक्तिरलङ्कारो द्वितीय ॥

प्रवाले बालरहस्ये निहितं पुष्पं यदि स्यान्निर्मलविद्रुमस्थं मुक्ताफलं च यदि स्यात्तदा गौर्यास्ताम्रोष्ठे व्याप्ता कान्तिर्यस्य तस्य स्वच्छस्य स्मितस्यानुकुर्यादत्र पुष्पप्रवालयोर्मुक्ताविद्रुमयोश्चासम्बन्धेऽपि यद्यर्थोक्तिकल्पनया सम्बन्धोक्त्याऽतिशयोक्तिस्तृतीया ॥

कवीन्द्राणामासन्प्रथमतरमेवाङ्गणभुव-
श्चलद्भृङ्गासङ्गाकुलकरिमदामोदमधुराः ।
अमी पश्चात्तेषामुपरि पतिता रुद्रनृपतेः
कटाक्षाः क्षीरोदप्रसरदुरुवीचीसहचराः ॥
(कुवलयानन्दः).

कवीनामिन्द्रा महाकवयस्तेषां गृहाङ्गणसम्बन्धिन्यः पृथिव्यः कारणात्पूर्वमेव चलद्भृङ्गात्यन्तसङ्गेनाकुला ये हस्तिनस्तेषां मदपरिमलेन रमणीया आसन् । तत्कारणभूता रुद्रनृपतेरमी क्षीरसागरसम्बन्धिनः प्रसरन्तो ये महान्त ऊर्मयस्तेषां सहचराः कटाक्षास्तु महाकवीनामुपरि

पश्चाद्विपतिताः । अत्र रुद्रनृपतिकृपाकटाक्षनिपतनगम्यप्रसादरूपकारणात्पूर्वमेव महाकवीनां गजादिसम्पत्तिरूपकार्यवर्णनेन कार्यकारणपौर्वापर्यविपर्ययरूपाऽतिशयोक्तिश्चतुर्थी । अत्र कारणस्यातिशैघ्र्यकारित्वं वक्तुं कार्यस्य पूर्वमुक्तिः । तदुक्तं काव्यप्रकाशे—" निगीर्याध्यवसानन्तु प्रकृतस्य परेण यत् ॥ प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥ कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ॥ विज्ञेयातिशयोक्तिः सा " परेणाप्रकृतेनोपमानेन निगीर्णस्य प्रकृतस्योपमेयस्य यदध्यवसानं स्वशब्दमन्तरेणाप्युपमेयावगतिः सैकातिशयोक्तिः । द्वितीया तु प्रस्तुतस्य लोकोत्तरधर्मारोपेणान्यत्ववर्णने । तृतीया यदिशब्दोक्त्या वा चेच्छब्दोक्त्याऽसम्भवद्वस्तुवर्णने । चतुर्थी कार्यकारणयोः पौर्वापर्यव्यतिक्रमेऽतिशयोक्तिर्विज्ञेया ॥ अत्र कार्यकारणयोः सहभावित्वेनापि पौर्वापर्यव्यतिक्रम इति तत्रापि भवत्यतिशयोक्तिरिति चक्रवर्तिमतं न साधु तादृशस्थले समुच्चयालङ्कारविषयत्वात् । इयञ्चातिशयोक्तिः स्वभावोक्तिभिन्नेषु प्रायः सर्वालङ्कारेषु प्राणत्वेनावस्थिता । उक्तञ्च महाकविना दण्डिना—" अलंकारान्तराणामप्येकमाहुः परायणम् ॥ वागीशसहितामुक्तिमिमामतिशयाह्वयाम् ॥ "



१२ प्रतिवस्तूपमा ।

आपद्गतः खलु महाशयचक्रवर्ती
विस्तारयत्यकृतपूर्वमुदारभावम् ।
कालागुरुर्दहनमध्यगतः समन्ता-
ल्लोकोत्तरं परिमलं प्रकटीकरोति ॥

गीर्भिर्गुरूणां परुषाक्षराभि-
स्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां
न जातु मौलौ मणयो वसन्ति ॥
वहति विषधरान्पटीरजन्मा
शिरसि मषीपटलं दधाति दीपः ।
विधुरपि भजतेतरां कलङ्कं
पिशुनजनं खलु बिभ्रति क्षितीन्द्राः ॥

(रसगङ्गाधरः).

महाशयेषु चक्रवर्तीव चक्रवर्ती महानुदार आपदि प्राप्तोऽपि स्वकीयमपूर्वमुदारभावं विस्तारयत्येव । यथा मध्येवह्नि स्थितोऽपि कालागुरुश्चन्दनविशेषोऽलौकिकं परिमलं सर्वतः प्रकटीकरोति । अत्र वाक्यद्वये विस्तारप्रकटनयोः सामान्यधर्मयोर्वस्तुगत्यैकरूपयोरपि पुनरुक्तिभिया शब्दान्तरेणाभिधानाद्वस्तुनो वाक्यार्थस्योपमानत्वाच्च प्रतिवस्तूपमालंकारः साधर्म्येण ॥

गुरूणां हितोपदेष्टॄणां कठोराक्षरवतीभिर्वाणीभिस्तिरस्कारं प्राप्ता नरा महत्त्वं गच्छन्ति । वैधर्म्यदृष्टान्ते यावन्मणयः शाणेनातिदीप्तकान्तिसम्पादकयन्त्रविशेषेण जायमानं यदुत्कषणमुल्लेखनं तन्न प्राप्नुवन्ति तावन्नृपाणां मुकुटे वासमपि नाप्नुवन्ति । अत्र वैधर्म्येण प्रतिवस्तूपमालङ्कारः ॥

पटीरजन्मा चन्दनवृक्षो वहति शिरसि सर्पान् । दीपो मषीसमूहं दधाति । चन्द्रोऽपि कलङ्कं भजते । राजानश्च द्विजिह्वजनं बिभ्रति । अत्र

वहनाधानभजनमरणां वस्तुत ऐकरूप्यान्मालारूपा प्रतिवस्तूपमा । लक्षणं काव्यप्रकाशे–" प्रतिवस्तूपमा तु सा ॥ सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ॥" यत्र वाक्यद्वये उपमानवाक्ये उपमेयवाक्ये च साधारणधर्मस्यैकस्यापि पुनरुक्तिभिया शब्दभेदेन द्विःस्थितिः सा प्रतिवस्तूपमा । सा च साधर्म्यवैधर्म्यमालाप्रकारैस्त्रिधेति संक्षेपः ॥

१५ दृष्टान्तः ।

अणुरप्युपहन्ति विग्रहः
प्रभुमन्तःप्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं
तरुशाखान्तनिघर्षजोऽनलः ॥

(किरातार्जुनीयम्).

तापत्रयं खलु नृणां हृदि तावदेव
यावन्न ते वलति देव कृपाकटाक्षः ।
प्राचीललाटपरिचुम्बिनि भानुबिम्बे
पङ्केरुहोदरगतानि कुतस्तमांसि ॥

(रसगङ्गाधरः).

इदं भीमं प्रति युधिष्ठिरवाक्यम् । अन्तरात्मा या प्रकृतयोऽमात्यादयस्तत्कोपजो विग्रहोऽणुरपि प्रभुं राजानं निहन्त्येव । अत्र दृष्टान्तः ।

तरुशाखान्तानां निघर्षो घर्षणं तज्जोऽनलोऽग्निर्भूधरं पर्वतं समग्रमपि हिनस्ति दहतीत्यर्थः । अत्र अन्तःप्रकृतिप्रकोपजविग्रहस्य नृपतेश्चोपमेयस्य तरुशाखान्तनिघर्षजानलस्य भूधरस्य चोपमानस्य उपहननस्य हिंसनस्य च साधारणधर्मस्य बिम्बप्रतिबिम्बतया निर्देशेन दृष्टान्तालङ्कारः साधर्म्येण ॥

हे देव ! यावत्ते कृपाकटाक्षो न वलति तावन्नृणां हृदये तापत्रयमाध्यात्मिकाधिदैविकाधिभौतिकलक्षणं भवति । अत्र वैधर्म्यदृष्टान्तः । प्राचीदिग्ललाटचुम्बनशालि सूर्यबिम्बे सति कमलान्तर्वर्त्तीनि तमांसि कुतो भवेयुर्नैव भवेयुरित्यर्थः । अत्र तापत्रयावस्थानतमोदूरीकरणयोर्वैधर्म्येण बिम्बप्रतिबिम्बभावाद्वैधर्म्येण दृष्टान्तालङ्कारः । तदुक्तं काव्यप्रकाशे—" दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् " एतेषां साधारणधर्मोपमानोपमेयानां सर्वेषां प्रतिबिम्बनं दृष्टान्तो निश्चयो यत्रेत्यन्वर्थसंज्ञो दृष्टान्तालङ्कारो विज्ञेयः । प्रतिवस्तूपमाया दृष्टान्तस्य च प्राचीनमतदाक्षिण्येन वैलक्षण्यं तस्यां धर्मो न प्रतिबिम्बितः किन्तु शुद्धसामान्यात्मनैव स्थितः । इह तु प्रतिबिम्बित इति । प्राचीनमतदाक्षिण्यत्यागे तु भेदाद्वैतावेकस्यैवालङ्कारस्य यच्च किञ्चिद्वैलक्षण्यं तत्प्रभेदत्वस्यैव साधकं नालङ्कारान्तरस्येति जगन्नाथपण्डिताः । प्रतिवस्तूपमायां तु प्रतीयत आपातत एव बिम्बप्रतिबिम्बभाव इह तु प्रणिधानगम्य इत्यनयोर्भेद इति न्यायालङ्कारमहेश्वराः ॥



१६ दीपकम् ।

मणिः शाणोल्लीढः समरविजयी हेतिदलितो
मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः ।

कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः
(कुवलयानन्दः).

स्रंसयति गात्रमखिलं
ग्लपयति चेतो निकाममनुरागः ।
जनमसुलभं प्रति सखे
प्राणानपि मंक्षु मुष्णाति ॥
(काव्यालङ्कारः).

शुक्लः श्वेतार्चिषो वृद्ध्यै पक्षः पञ्चशरस्य सः ।
स च रागस्य रागोपि यूनां रत्युत्सवश्रियः ॥
(काव्यादर्शः)

निकषपाषाणेनोल्लिखितो मणिः । शस्त्रक्षतो विजयशीलो योद्धा । मदेन क्षीणो हस्ती । शरदृतौ जलराहित्येन शुष्कतटा नद्यः । कलामात्रशेषश्चन्द्रः । सम्भोगे चुम्बनालिङ्गनाद्युपमर्देर्म्लायिताङ्गी नवयौवना वनिता । एवं याचकेषु संक्रान्तो विभवो येषां ते नृपाश्च । तनिम्ना कार्श्येन शोभन्ते । इतरप्रकारकशोभावहमप्येतत्प्रकारकं शोभावहं कार्श्यमित्यर्थः । अत्र प्रकृतानां नृपाणामप्रकृतानां मण्यादीनां च शोभिकधर्मान्वयत्वेन दीपकालङ्कारः ॥

दुर्लभं जनं प्रति योऽत्यन्तमनुरागः सोऽखिलं शरीरं विध्वस्तं करोति चित्तमपि ग्लानिमत्करोति । हे सखे ! नैतावदेव किन्तु शीघ्रं प्राणानपहरति । अत्रानुरागः कर्तृकारकमेकं बह्वीषु स्रंसनादिषु क्रियासु वर्तत इति कारकदीपकालंकारः ॥

सुरतः यशः श्वेताभिधचन्द्रस्य वृद्ध्यै स च चन्द्रः कामस्य वृद्ध्यै स च कामो रागस्य वृद्ध्यै स रागोऽपि पुना रतिसम्बन्धसुखसम्पत्त्या वृद्ध्यै । अत्र सुरतयशआदिना पूर्वेण पूर्वेण वस्तुनोत्तरोत्तरवस्तुन उपकारकरणान्मालादीपकालङ्कारः । लक्षणं काव्यप्रकाशे—" सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ॥ सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥ मालादीपकमाद्यं चेद्यथोत्तरगुणावहम् ॥ " उपमानोपमेयानां क्रियादिधर्मस्यैकवारमेवोपादाने समस्तवाक्यदीपनाद्दीपकालङ्कारः । एकस्य कर्त्रादिकारकस्य बह्वीषु क्रियासु सकृद्वृत्तिः कारकदीपकालङ्कारः । पूर्वेण पूर्वेणोत्तरस्योत्तरस्योपकृतिश्चेत् तत्र मालादीपकमिति त्रिविधं दीपकम् ॥



१७ तुल्ययोगिता ।

शृङ्गाणि द्रुतकनकोज्ज्वलानि गन्धाः
कौसुम्भं पृथु कुचकुम्भसङ्गि वासः ।
मार्द्वीकं प्रियतमसन्निधानमास–
न्नारीणामिति जलकेलिसाधनानि ॥

(शिशुपालवधम्).

न्यञ्चति बाल्ये सुदृशः
समुदञ्चति गण्डसीम्नि पाण्डिमनि ।
मालिन्यमाविरासी–
द्राकाधिपलवलिकनकानाम् ॥

(रसगङ्गाधरः).

जलक्रीडाप्रस्तावे तप्तनिषिक्तेन कनकेनोज्ज्वलानि क्षिप्तानि शृङ्गाणि क्रीडोपयोगिजलप्रक्षेपयन्त्राणि चन्दनकुङ्कुमादयो गन्धाः विशालं कुचकुम्भावरणं कुसुम्भेन रङ्गविशेषेण रक्तं वासो वस्त्रं मृद्वीकाया द्राक्षाया विकारभूतं द्राक्षामद्यं प्रियतमसामीप्यं च नारीणामेतानि जलक्रीडासाधनान्यासन् । अत्र शृङ्गादीनां केलिसाधनत्वस्वरूपतुल्यधर्माभिसम्बन्धात् कृतत्वाच्च सर्वेषां केवलप्रकृतगोचरस्तुल्ययोगिताऽलङ्कारः ॥

सुदृशो युवत्या बाल्ये तिरोभूते सति गण्डसीमनि पाण्डुभा प्राकट्यं गच्छति सति पूर्णचन्द्रलवलिकन्तकानां मलिनत्वमाविर्भूतम् । नायिकामुखकान्त्यपेक्षया चन्द्रादीनामतिहीनकान्तित्वात् । अत्राप्रकृतानां चन्द्रादीनां मालिन्याविर्भावान्वयादप्रकृतैकगोचरस्तुल्ययोगिताऽलंकारः । इह केवलानां प्राकरणिकानामप्राकरणिकानामेव वा बहुत्वमनेकत्वार्थं सकृद्धर्मोपादानम् । द्वयोर्मिश्रणे तु दीपकमेव पर्यवस्यति । लक्षणं काव्यप्रकाशे—" नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ॥ " नियतानां प्राकरणिकानामप्राकरणिकानां वा धर्मः क्रियादिरेकवारमेवोपादीयेत चेत्सा पुनस्तुल्ययोगिता तन्नामालंकार इत्यर्थः ॥



१८ व्यतिरेकः ।

लभ्यमेकसुकृतेन दुर्लभा
रक्षितारमसुरक्ष्यभूतयः ।
स्वन्तमन्तविरसा जिगीषतां
मित्रलाभमनुलाभसम्पदः ॥
(किरातार्जुनीयम्)

असकृदिह शशाङ्कः क्षीणतां सङ्गतोऽपि
सुतनु समभिवृद्धिं याति सत्यं तु कान्ते ।
इदमनुपमसौख्यं यौवनं सन्निशान्तं
पुनरपि न निवर्त्ति प्रीतियुक्तद्भव त्वम् ॥

(इदं मम).

जेतुमिच्छतां नृपाणामेकमुक्तेन लभ्याद्दाक्षितुः शोभनपरिणामाश्च मित्रलाभाद्दुर्लभा असुरस्या भूतयो यासां ता. परिणामविरसाश्च लाभसम्पदोऽर्थसम्पदो हीना इत्यर्थ. । अत्रोपमानत्वेन कल्पिताया अर्थसम्पदोऽर्थप्राप्तेरुपमेयत्वेन कल्पितस्य मित्रलाभस्याधिक्यप्रतिपादनाद् व्यतिरेकालङ्कारः । उपमानोपमेयभावश्चात्रेवादितुल्यादिशब्दानुपादानेनाक्षिप्तो द्वयोरपि न्यूनत्वाधिक्ययोर्हेतुकथनमत्र ॥

मानात्यागिनी नायिकां प्रति नायकोक्तिरियम् । हे सुन्दरि ! मानाद्विरमे प्रसीद च । क्षीणोऽपि चन्द्रो भूयोऽभिवृद्धिं प्राप्नोति तस्यैव पुनर्यौवन यद्गतं तत्तु गतमेव न पुनरावर्तते । अत्रोपमानस्य चन्द्रस्य पुनर्वृद्ध्यपेक्षयाऽनिवर्तिनो यौवनस्याधिक्याधिक्येनाधिक्यविवक्षया व्यतिरेकालङ्कारः। लक्षणं काव्यप्रकाशे—" उपमानाद्यदन्यस्य व्यतिरेक स एव स. ॥ हेत्वोरुक्तावनुक्तीनां त्रये साम्ये निवेदिते ॥ शब्दार्थाभ्यामथाक्षिप्ते श्लिष्टे तद्वदिरष्टधा ॥" यत्रोपमानादन्यस्योपमेयस्य व्यतिरेक आधिक्यं भावे यत् तत्र स एव व्यतिरेक एव स व्यतिरेकालङ्कार इत्यर्थो योगेनैव लक्षणं व्याख्यातम् । तत्रोपमेयोत्कर्षहेतोरुपमानापकर्षहेतोश्चोक्तावेको भेदः । उपमेयोत्कर्षहेतोरनुक्तावुपमानापकर्षहेतोरनुक्तौ द्वयोरप्यनुक्तौ च त्रयोऽनुक्तिभेदाः । समष्ट्या चत्वारो भेदाः । उपमानोपमेयभावे

शाब्दे चार्थे सत्यष्टावाशीते पुनर्द्वादशाश्लिष्टास्त एव श्लिष्टाश्चिरष्टश चतुर्विंशतिर्भेदाः ॥

खड्गमात्रसहायस्य बहुशात्रवनाशने ।
परस्य प्राकृतस्येव न मदोऽस्य प्रधीमतः ॥

(इदं मम).

अत्र प्राकृतशब्दवाच्यतुच्छजन उपमानं राजोपमेयस्तयोर्निकर्षोत्कर्षहेत्वोस्तुच्छताप्रधीमत्त्वयोरुक्तिरिवोपादानाच्च शाब्दमौपम्यम् । अत्रैव तुच्छतायां एव प्रधीमत्त्वस्यैव द्वयोर्युगपद्वाऽनुपादाने त्रयोऽनुक्तिभेदाः शाब्दा बोध्याः ।

केवलखड्गसहायोप्यरिवर्गपराभवे महावीरः ।
प्राकृतजनवन्न मदी धृतिमान्नयवानयं नृपतिः ॥

(इदं मम).

अत्रार्थमौपम्यं तुल्यार्थे वतिप्रयोगाद्धेत्वोरुक्तिरत्रैव पूर्ववदनुक्तित्रयमूह्यम् ॥

सुनेत्रेयं रतिमती जितपङ्कजसुश्रिया ।
स्वमुखेनाकलङ्केन जयत्यब्जं कलङ्कितम् ॥

(इदं मम).

अत्रेवादितुल्यादिशब्दाभावादाक्षिप्तमौपम्यमकलङ्कित्वकलङ्कित्वहेत्वोरुक्तिरत्राप्यनुक्तित्रयमूह्यम् ॥

... परिभवाज्ज्ञानज्येष्ठानुवर्त्तिनः ।
न वै दृढगुणस्यास्योत्पलवद्भङ्गुरा गुणाः ॥

(

अत्रेवार्थे वतिप्रत्ययो गुणशब्दश्च कमले तन्तुवाची पुरुषे विनयादिवाच्यपि श्लिष्टः पङ्कजन्मादुत्पन्नत्वेन वनेः शाब्दमौपम्यं गुणगतातिगारत्वभङ्गुरते उत्कर्षनिकर्षहेतू । हेत्वनुक्तित्रयं पूर्ववत् ॥

अभङ्गमण्डलः श्रीयुक् प्रेक्षस्वैष धराधवः ।
न जैवातृकवत् क्वापि कलाराहित्यमाप्तवान् ॥

(इदं मम).

अत्र तुल्यार्थे वतिप्रयोगादार्थमौपम्यं चन्द्रे षोडशभागवाची नृपे वैदग्ध्यवाची कलाशब्दः श्लिष्टः । कलावैकल्याखण्डमण्डलत्वे निकर्षोत्कर्षहेतू । पूर्ववदनुक्तित्रयम् ॥ मालाव्यतिरेकोऽपि सम्भवति । भेदा ऊह्याः । दिङ्मदर्शनं यथा—

विभो विषमदृष्टिस्त्वं हरवन्नासि सर्वदा ।
कृष्णवन्न वृषाहन्ता सूर्यवन्न करार्तिदः ॥

(इदं मम).

शिवस्त्रिनेत्रत्वेन विषमदृष्टिः । त्वं तु पक्षपातराहित्येन समदृष्टिः । हरिर्गहतो वृषासुरस्य आहन्ता । त्वं तु धर्मस्य न हन्ता । रविस्तु अतिदुःसहकिरणैरार्तिदाता । त्वं तु राजग्राह्यभागग्रहणादिना न तथेति श्लिष्टैः शब्दैर्वार्थमौपम्यं मालाव्यतिरेकः । अत्र निकर्षहेतोर्विषमदृष्टित्वादेरुक्तिरुत्कर्षहेतोः समदृष्टित्वादेरनुक्तिः ॥

सर्वदोधरप्रतापेन क्षणदानुदितप्रभः ।
भास्वत्तेतेन देवेन भास्वानपि पराजितः ॥

(इदं मम).

अत्राक्षिप्तोपमा भास्वतेति श्लेषः । उपमेयभूपगतसर्वदोदितप्र-
ताप(?)त्वस्योत्कर्षहेतोरुपमानभूतसूर्यगतरात्रिमीलितप्रतापत्वस्य निकर्षहेतोश्च
किरेवमन्येऽपि भेदा द्रष्टव्याः ॥ वृत्तो व्यतिरेकः ॥



१९ आक्षेपः ।

स्मरशरशतविधुराया
भणामि सख्याः कृते किमपि ।
क्षणमिह विश्राम्य सखे
निर्दयहृदयस्य किं वदाम्यथवा ॥

(साहित्यदर्पणम्).

अत्रानेककामबाणदुःखिताया सख्याः कृते हे सखे ! कि[illegible]
वदामि किंचित् मत्र क्षणमिहस्थित्वा निर्दयहृदयस्य किं वदामि ! [illegible]
वदामीति वक्ष्यमाणनिषेधेन वक्ष्यमाणनिषेधरूप आक्षेपालङ्कारः ॥

श्वासोऽनुमानवेद्यः शीतान्यङ्गानि निश्चला दृष्टि[illegible]
अस्याः सुभग कथेयं तिष्ठतु नायककथान्तरं कथय[illegible]

(रसगङ्गाधरः).

दूतिः नायिकाया विरहावस्थां नायकं प्रति वदति । हे सुभ[illegible]
अस्याः श्वासोऽनुमानेन वेदनीयोऽङ्गानि शीतानि दृष्टिश्च श्यामा(?)[illegible]
[illegible] तिष्ठतु ते नेन [illegible] प्रयोजन कथयान्यां कथामपि[illegible]
[illegible]

लक्षणं काव्यप्रकाशे—" निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ॥ वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ॥ " प्राकरणिकत्वेन विवक्षितस्य कार्यस्य वक्ष्यमाणविषयेऽशक्यवक्तव्यत्वमुक्तविषये स्वतिप्रसिद्धत्वं वा विशेषं वक्तुं निषेध इव यः प्रतीयते स वक्ष्यमाणोक्तविषयत्वेन द्विधा मत आक्षेपालङ्कार । अनुमानेऽयं गतार्थमिति इत्यवगद्: केचिदिति रसगङ्गाधरमर्मप्रकाशप्रकाशका नागेशभट्टाः ॥



२० विभावना ।

अपरीक्षितकारिणा गृहीतां
  त्वमनासेवितवृद्धपण्डितेन ।
अविरोधितनिष्ठुरेण साध्वीं
  दयितां त्रातुमलं घटस्व राजन् ॥

(भट्टिकाव्यम्).

जाता ते सखि साम्प्रत-
  मभ्रमपरिमन्थरा गतिः किमियम् ।
कस्मादभवदकस्मा-
  दियममधुमदालसा दृष्टिः ॥

(काव्यालङ्कार.).

रामं प्रति वायुपुत्रस्योक्तिः । हे राम ! अविचारितकरणशीलेन, न सेविता वृद्धा येन तथापि पण्डितेनाज्ञानप्रकृतोऽपि यः शत्रुः संवृत्तस्तेन रावणेन गृहीतां सतीं सीतां त्रातुमलं यतस्व । अत्र परीक्षा करणस्य

वृद्धसेवा पण्डितत्वस्य विरोधश्च शत्रुत्वस्य हेतुक्रिया तस्याः प्रतिषेधे
तत्फलव्यक्तेर्विभावनालङ्कारः । तथैव द्वितीयश्लोकेऽपि श्रमादिनिषेधेन
न्थैरत्वादेः कथनात्स एवालङ्कारः । लक्षणं काव्यप्रकाशे " क्रियाप
प्रतिषेधेऽपि फलव्यक्तिर्विभावना ॥ " कारणरूपक्रियानिषेधेऽपि तत्क
र्यप्रकाशनं विभावनाऽलङ्कारः ॥



२१ विशेषोक्तिः ।

धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः ।
प्रभवोप्यप्रमत्तास्ते महामहिमशालिनः ॥

(साहित्यदर्पणम्).

प्रतिपलमखिलाँल्लोकान्
मृत्युमुखं प्रविशतो निरीक्ष्यापि ।
हा ! हतकं चित्तमिदं
विरमति नाद्यापि विषयेभ्यः ॥

(रसगङ्गाधरः).

हरताऽपि हरेण यस्य देहं
न बलं नाशितमित्यतः स एकः ।
जयति प्रतिपक्षहृत्स्वशक्ती
रतिकारी हि जगन्ति पुष्पधन्वा ॥

अत्र सत्यपि धनित्वयुवत्वप्रभुत्वरूपे कारणे उन्मदत्वचपलत्वमत्तत्वरूपकार्यानुत्पादेन विशेषोक्तिरलङ्कारो महामहिमशालित्वोपादानादुक्तनिमित्तः ॥

प्रतिपलं मृत्योर्मुखं गच्छन्तो लोकानिरीक्ष्यापि चित्तमिदं विषयेभ्यो नोपरमति । अत्रापि स्वजनमरणदर्शनरूपे विषयविरमणकारणे सत्यपि विषयविरमणरूपकार्यानुदयादनुक्तनिमित्ता विशेषोक्तिः । रागोत्कटतारूपं प्रतिबन्धकं कार्यानुत्पादे निमित्तम् । तच्चात्र प्रतीयमानमपि न शब्दोपात्तमित्यनुक्तनिमित्ता ॥

स एकः पुष्पायुधो जयति त्रीणि जगन्ति । यस्य शरीरं हरताऽपि शिवेन बलं न हृतमत्रापि बलहरणकारणे तनुहरणे निरूपितेपि तत्कार्यस्य बलहरणस्याननुनाद्विशेषोक्तिरचिन्त्यनिमित्ता । लक्षणं तु काव्यप्रकाशे— " विशेषोक्तिरखण्डेषु कारणेषु फलावचः ॥ " कारणसम्पत्तौ सत्यामपि फलानुद्भावकथनं विशेषोक्तिरलङ्कारः । सा चोक्तानुक्ताचिन्त्यनिमित्तत्वेन त्रिविधा तथैवोदाहृता ॥



२२ यथासंख्यम् ।

कपिपृष्ठगतौ ततो नरेन्द्रौ
 कपयश्च ज्वलिताग्निपिङ्गलाक्षाः ।
मुमुचुः प्रययुर्द्रुतं समीयु-
 र्वसुधां व्योम महीधरं महेन्द्रम् ॥
(भट्टिकाव्यम्

वृन्दापितृगहनचरौ
कुसुमायुधजननहननशक्तिधरौ ।
अरिशूललाञ्छितकरौ
भीतिं मे हरिहरौ हरताम् ॥

(रसगङ्गाधरः).

तदनन्तरं हनूमत्पृष्ठगामिनौ रामलक्ष्मणौ अग्निनाशिविपिनकान्यक्षीणि येषान्ते वानराश्च वसुधां सुमुक्षुर्व्योम प्रपद्य महेन्द्राख्यं पर्वतं च समीयुः । अत्र मुनियात्येतीनां वसुधादिभिर्यथाक्रममन्वयाद्यथासंख्यालंकारः ॥

वृन्दावनश्मशानचरौ कामोत्पत्तिनाशकरौ चक्रत्रिशूलधरौ हरिहरौ मम भयं हरताम् । अत्रापि पूर्वं समासेन समासान्वयेऽवयवानामन्वय आर्थिक इति यथासंख्यालंकारः । लक्षणं काव्यप्रकाशे—" यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥ " क्रमेण प्रथमद्वितीयादिक्रमेण क्रमोक्तानामन्वयो यथासंख्यनामालंकारः ॥



२३ अर्थान्तरन्यासः ।

छायामपास्य महतीमपि वर्त्तमाना-
मागामिनीं जगृहिरे जनतास्तरूणाम् ।
सर्वो हि नोपगतमप्यपचीयमानं
वर्द्धिष्णुमाश्रयमनागतमभ्युपैति ॥

दानं ददत्यपि जलैः सहसाधिरूढे
को विद्यमानगतिरासितुमुत्सहेत ।
यद्दन्तिनः कटकटाहतटान्मिमङ्क्षो-
र्मङ्क्षूदपाति परितः पटलैरलीनाम् ॥
(शिशुपालवधम्)

अहन्नेको रणे रामो यातुधानाननेकशः ।
नूनं सहायसम्पत्तिमपेक्षन्ते बलोज्झिताः ॥

नूनं सहायसम्पत्तिमपेक्षन्ते बलोज्झिताः ।
अहन्नेको रणे रामो यातुधानाननेकशः ॥
(रसगङ्गाधरः).

जनानां समूहा जनतास्तद्रूपाणां वृक्षाणां वर्तमानां महतीमपि छायामपास्य त्वया आगामिनीमल्पामपीनिःशेषच्छायामाश्रितवत्यो वर्द्धिष्णुत्वात् । क्षयवृद्धिमयुक्तत्वेन त्यागस्वीकारयो र्ह्रासत्यागो न दोषावह इति सर्वाधारेण प्रमाणयन्ति । सर्वो लोक उन्नतं ह्रासमप्यपचीयमानं क्षीयमाणमाश्रयं नोपैति नाश्रयत्यपित्वनागतमप्यल्पमपि वर्द्धनशीलमाश्रयं स्वीकुरुते । अत्रोत्तरार्द्धप्रतिपादितेन ह्रासस्याप्यपचीयमानस्य त्यागेनानागतस्यापि वर्द्धिष्णोराश्रयेण च सामान्यार्थेन पूर्वार्द्धप्रतिपादितस्य वर्तमानमहच्छायात्यागस्याल्पच्छायाश्रयस्य च विशेषस्य समर्थनात्सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ॥

दानं धनं मदं च ददत्यपि पुरुषे गजे चेति शेषः । सहसा जडैर्नीचैराक्रान्ते सति विद्यमानगति कस्तत्रासितुमुत्सहेत ! न कोऽपीतिभावः । यस्मान्मङ्क्तुमिच्छोर्दन्तिनो गजस्य गण्ड कटाह इव तस्य मदेशाद्भ्रमराणां

समूहैर्विश्वतः शीघ्रमेवोत्पतितम् । अत्रोत्तरार्द्धोक्तेन जलमज्जनतत्परगज-गण्डस्थलस्थितगत्यन्तरसमर्थभ्रमरकृततत्त्यागरूपेण विशेषेण पूर्वार्द्धोक्तस्य सगतिकपुरुषकर्तव्यो यो जडजनाक्रान्तधनदातृत्यागस्तद्रूपस्य सामान्यस्य समर्थनाद्विशेषेण सामान्यसमर्थनरूपोर्थान्तरन्यासः । उदाहरणद्वयं साध-र्म्येण ज्ञेयम् ॥

एकोऽपि रामो युद्धेऽनेकशो राक्षसान् हतवान् । यतो बलरहिता एव सहायसम्पत्तिमपेक्षन्ते न बलवन्तः । अत्रैकेनैव रामेण कृतमनेक-राक्षसहननं विशेषस्तेन वैधर्म्येण बलवर्जितापेक्षितसहायसमर्थनरूपं सामान्यं समर्थ्यत इति वैधर्म्येण विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥

अत्र दुर्बलवृत्तान्तः प्रकृत इति वैधर्म्येण सामान्येन विशेषी-भूतरामवृत्तान्तसमर्थनाद्वैधर्म्येण सामान्येन विशेषसमर्थनरूपोऽर्थान्तर-न्यासः । लक्षणं काव्यप्रकाशे—"सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ॥ यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥" साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण विशेषो वा सामान्येन यत्र समर्थ्यते सोऽर्थान्तरन्यासोऽलङ्कारः ॥



२४ विरोधः ।

तव विरहे मलयमरुद्
  दवानलः शशिरुचोऽपि सोष्माणः ।
हृदयमलिरुतमपि भिन्ते
  नलिनीदलमपि निदाघरविरस्याः ॥

सन्ततमुसलासक्ता
बहुतरगृहकर्मघटनया नृपते ।
द्विजपत्नीनां कठिनाः
सति भवति कराः सरोजसुकुमाराः ॥
(साहित्यदर्पणम्).

खलानां कोमलमपि वाक्यं दन्दग्धि सन्मनः ।
अमृद्वपि हि सद्वाक्यं पाटीरवदसौख्यहृत् ॥
(इदं मम).

विचारिते माहेमनि त्वदीये निरवनिर्गले ।
परमात्मन्गगनमप्याधत्ते परमाणुताम् ॥
(रसगङ्गाधर).

कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी ।
याति विश्वसनीयत्वं कस्य ते कलभाषिणि ॥
(काव्यादर्श).

न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ।
त्वद्वाजिराजिनिर्धूतधूलिभिः पङ्किला हि सा ॥
वल्लभोत्सङ्गसङ्गेन विना हरिणचक्षुषः ।
राकाविभावरीजानिर्मध्यन्दिनादिनाधिपः ॥
(साहित्यदर्पण

अत्र मरुतामेकोनपञ्चाशत्त्वेन मरुत्त्वजातेर्दहनत्वजात्या चन्द्ररुक्त्वजातेरुष्णगुणेन भ्रमरस्तुत्यजातेर्हृदयभेदनक्रियया नलिनीदलत्वजातेश्च निदाघरविद्रव्येण विरोधो भासत आपाततस्तथापि विरहावस्थायामारोप्यमाणत्वेनावास्तवत्वादविरोधः। मरुदादेर्बहुत्वक्रियावत्त्वाज्जातिशब्दत्वम्। अत्र जातिक्रियाभिन्नं धर्ममात्रमसाधारणमेव गुणो न तु वैशेषिकपरिभाषित एव। अत्रैकस्मिन्नर्थे वृत्ताश्चत्वारो भेदाः॥

अत्र राजस्तुतौ नृपदत्तदानेन ब्राह्मणपत्नीनां पूर्वमवहननादिश्रमेण काठिना अपि कराः कमलवत्सौकुमार्यभाजस्तेन कठिनत्वसुकुमारत्वयोर्गुणयोरेकत्र विरोधेपि कालभेदान्न विरोधः।

अत्र कोमलत्वगुणस्य दाहक्रियया अमृदुत्वगुणस्य च दुःसहरणक्रियया विरोधेपि सुजनदुर्जनवचनस्वभावान्न विरोधः। दन्दहीति दह भस्मीकरणे इत्यस्मात्—"लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्। ३।१।२४॥" इत्यनेन यङि—"यङोचि च। २।४।७४॥" इत्यनेन लुकि—"जपजभदहदशभञ्जपशां च। ७।४।८६॥" इत्यनेन नुकि सिद्धम्॥

परमात्मस्तुतौ गगनद्रव्यस्य परमाणुपरिमाणगुणस्य च विरोधेऽपि परात्मनोऽचिन्त्यमहिमत्वादविरोधः॥

हे मधुरभाषिणि! श्रीकृष्णार्जुनयोरनुरागवत्यपि तत्प्रतिपक्षराधेयाश्रयवती तव दृष्टिः कस्य विश्वासपात्रम्?। अत्र कृष्णार्जुनानुरञ्जनकर्णाश्रयणक्रिययोर्विरोधेपि श्लेषमहिम्नाऽविरोधः। श्लेषस्तु मध्ये कृष्णा ततः श्वेता ततश्चानुरक्ता ते दृष्टिः कर्णपर्यन्तं दीर्घेति।

नृपस्तुतौ हररूपद्रव्यस्य गङ्गात्यागक्रियायाश्च विरोधेऽपि नृपस्तुतिपरकविप्रौढोक्त्याऽविरोधः॥

अत्र चन्द्रमोऽद्रव्यमप्यचन्दिमरविद्रव्ययोर्विरोधेऽपि वल्लभविरहपार-वश्यादारोपेणाविरोधः । लक्षणं काव्यप्रकाशे—" विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः ॥ जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद्गुणास्त्रिभिः ॥ क्रिया द्वाभ्यामपि द्रव्यं द्रव्येणैवेति ते दश ॥ " वस्तुगत्याऽविरोधेऽपि यद्विरोधयोरिवाभिधानं स विरोधालङ्कारः । इममेव विरोधाभासं वदन्त्यन्ये । जातेर्जातिगुणक्रियाद्रव्यैश्चतुर्भिर्गुणस्य गुणक्रियाद्रव्यैस्त्रिभिः क्रियायाः क्रियाद्रव्याभ्यां द्वाभ्यां द्रव्यस्य च द्रव्येणैकेन विरोधसम्भवात्समष्टया दशप्रकारो विरोधाऽलङ्कारस्तदनुक्रमेणैवोदाहृतः । विरोधस्य सामान्यलक्षणं तु एकाधिकरण्येन प्रतिद्वन्द्वसम्बन्धिनोरैकाधिकरण्येनासम्बद्धत्वभासनं प्रसिद्धवैयधिकरण्येनासम्बद्धयोः सामानाधिकरण्येनावभासनं वा विरोधः । अत्र प्रसङ्गवशाज्जातिविचार उच्यते । " चतुष्टयी शब्दानां प्रवृत्तिः । " इति वदता महाभाष्यकारेण जातिगुणक्रियायदृच्छाशब्दा अभिप्रेतास्तन्मतमेव प्रकाशकृतामपि सम्मतमिति भाति । जात्यादिलक्षणविचारे नैयायिकादिसिद्धान्तप्रदर्शनमतिविस्तृतं तु साहित्यादिनोपक्षेयमालङ्कारिकसमयाविरुद्धं चोपादेयमत्र । यथा—" नित्यमेकमनेकानुगतं सामान्यम् । " इति जातिपरपर्यायसामान्यलक्षणं प्रायोऽविरुद्धं सर्वशास्त्रादीनां यथा गोत्वादि । जातिबाधे तु—" व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः ॥ रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ॥ " यथा चन्द्रत्वं न जातिश्चन्द्रव्यक्तेरेकत्वात् । घटत्वकलशत्वादीनां पर्यायत्वेन घटत्वकलशत्वरूपे न पृथग्जाती तुल्यत्वात् । भूतत्वरहिते मनसि मूर्तत्वं मूर्तत्वरहिते गगने भूतत्वं तयोर्मूर्तत्वभूतत्वयोः पृथिव्यादिषु सत्वात्सङ्करोऽतो भूतत्वं मूर्तत्वं च न जातिः । जातेर्जातिमत्त्वेऽनवस्थाऽतो जातित्वं न जातिः । विशेषस्य जातिमत्त्वे " निःसामान्यत्वे सति समवेतत्वं विशेषः " इतिविशेषलक्षणहाने रूपहानेर्विशेषत्वं न जातिः । समवाये समवायस्वकल्पने सम्बन्धान्तराभावात्

समवायत्वं न जातिरित्येवं षड् जातिदूषणानि । नव्यनैयायिकास्तु श्रोत्रेन्द्रिये न पृथ्वीत्वं घटे पृथ्वीत्वं नेन्द्रियत्वं तर्हि घ्राणे पृथ्वीत्वेन्द्रियत्वयोः सद्भावात् पृथ्वीत्वे जातिर्न स्यात् । तत्तु सर्वविरुद्धमतः सङ्करो जातेर्न बाधक इति दिनकरभट्टाचार्या आहुः ॥ " संज्ञाजातिक्रियाशब्दान्हित्वाऽन्ये गुणवाचिनः ॥ " तथा " सत्वे निविशतेऽपैति पृथग्जातिषु दृश्यते ॥ आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गुणः ॥ " इति " वो तो गुणवचनात् ।४।१।४४॥ " इति सूत्रे महाभाष्यं तद्व्याख्यानं तत्त्वबोधिन्य दृष्टव्यम् । वस्तु जात्या सहैवोत्पद्यते क्षणमेकं निर्गुणं तिष्ठति ततो गुणवद्भवतीति जातिगुणयोर्भेदः । प्रदीपकारादयस्तु गुणानां नित्यत्वेन सहवोत्पत्तिस्तथापि शुक्लादिगुणोऽपैत्यपि कदाचिज्जातिस्तु न कदाचिदप्यपैतीति गुणजात्योर्भेद इत्याहुः ॥ क्रियालक्षणमुक्तं भर्तृहरिणा वाक्यपदीये—" यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते ॥ आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते ॥ " इति । द्रव्यशब्दास्तु संज्ञाशब्दयदृच्छाशब्दापरपर्याया डित्थादयः प्रायोऽस्यवार्थचिन्ताऽनर्हाः । आलङ्कारिकहि वैयाकरणमतमवलम्ब्य एतादृशविषये । इति दिङ्मात्रमिदं विस्तारस्तु नेन्यत्र इत्यलङ्कुशेखम् ॥

२५ स्वभावोक्तिः ।



ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम्

दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्ण
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां
प्रयाति

(अभिज्ञानशाकुन्तलम्)

रथेन मृगमनुधावन्दुष्यन्तः सारथिं प्रति वक्ति । मृग ! दूरमनु सारङ्गेण वयमाकृष्टा अद्य पुनरिदानीमपि पश्चादागच्छति रथे ग्रीवाभङ्गे नाभिरामं यथा स्यात्तथा मुहुर्दत्तचक्षुः । बाणपातभयादपि केन स्वशरीर पश्चार्द्धभागेन पूर्वभागं प्रविष्ट इवेति गम्योऽस्ति । पुनश्चार्धचर्वि दर्भेण विवृतं व्याप्तं यन्मुखं तस्मादपि पतद्भिर्दर्भैः कीर्णो मार्गो येनैवाह- ऽयं मृग उत्प्लुतोऽयं वनत्वादाकाशेऽधिकं प्रयाति पृथिव्यां स्वल्पं प्रयाति तत्स्वेनैव स्वभावो इदं कर्म । अत्र मृगस्य प्रवृत्तनृपादेर्भयादादरयन्त्या मृगस्यानुभूयते तादृश्येव क्रियारूपाभ्यां चित्तावर्जकतया वर्णितेति स्वभावोक्तिरलङ्कारः । लक्षणं काव्यप्रकाशे—"स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ॥" डिम्भो बालकः. आदिना मृगशावकादिः धादिस्तस्य तन्निष्ठक्रियारूपयोश्चमत्कृतिजनकतावच्छेदकेन वर्णनं स्वभावोक्तिरलङ्कारः ॥

२६ व्याजस्तुतिः ।

उर्वीं शासति मय्युपद्रवलवः कस्यापि न स्यादिति
प्रौढं व्याहरतो वचस्तव कथं देव प्रतीमो वयम् ।

प्रत्यक्षं भवतो विपक्षनिवहैर्यामुत्पतद्भिः क्रुधा
यद्युष्मत्कुलकोटिमूलपुरुषो निर्भिद्यते भास्करः
(रसगङ्गाधरः)

व्याजस्तुतिस्तव पयोद मयोदितेयं
यज्जीवनाय जगतस्तव जीवनानि ।
स्तोत्रं तु ते महदिदं घन धर्मराज-
साहाय्यमर्जयसि यत्पथिकान्निहत्य ॥
(साहित्यदर्पणम्).

हे राजन्! मयि पृथ्वीं पालयति कस्यापि प्राणिनो नोपद्रवलेशोऽपीति यद्भवतः मीदं वचनं तद्वयं कथं प्रतीतिविषयं कुर्मो यतः प्रत्यक्षमेव स्वर्गं गच्छद्भिस्तव शत्रुसमूहैः क्रोधेन युष्माकं कुलकोटीनां मूलपुरुषः सूर्यो निर्भिद्यते भेदनाक्रियाकर्मीभूत. क्रियते । का कथेतरोपद्रवहरणस्य । सूर्यमण्डलभेदिन. स्वर्गगामिन इति शास्त्रसमयः । अत्र राजवर्णनप्रस्तावे तव मूलपुरुषरक्षणमपि न पारितं तर्हि सर्वोपद्रवहरणं तु दूरापास्तमित्यामुखतो निन्दाप्रतीतावपि स्व शूरशत्रुहननकर्तृत्वमिप्रायेण निन्दा बाधिता सती स्तुतावेव पर्यवस्यतीति व्याजस्तुतिरलङ्कारः ॥

हे जलद! तव जीवनानि जलानि जगतो जीवनायेति या तव स्तुतिः सा तु व्याजस्तुतिश्छलरूपा स्तुतिः परं ते स्तोत्रं त्विदं महद्यत्त्वं स्वोदयेन विरहिणः पथिकान्निहत्य यमस्य सहायता करोषि । अत्र त्वं यमस्य साहाय्यकं करोषीत्यापातत स्तुतिरपि विरहिजनपथ्यत्वकारकत्वमिति निन्दैवेति व्याजस्तुतिः । लक्षणं काव्यप्रकाशे—" व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा ॥ " व्याजरूपा स्तुतिर्व्याजेन वा स्तुतिरिति

कर्मधारयकृतोभयानुरूपाभ्यां द्वयोरपि शब्दार्थत्वम् । मुखचपलाततो निन्दापि स्तुतिर्वापि स्यादिः पर्यासिरन्यथा विपरीता चेद्व्याजस्तुतिरलङ्कारः ॥



२७ सहोक्तिः ।

छाया संश्रयते तलं विटपिनां श्रान्तेव पान्थैः समं
मूलं याति सरोजलस्य जडता क्लान्तेव मीनैः समम् ।
आचामत्यहिमांशुदीधितिरपस्तप्तेव लोकैः समं
निद्रा गर्भगृहं सह प्रविशति क्लान्तेव कान्ताजनैः ॥

(कुवलयानन्दः).

ग्रीष्मर्त्तौ मध्याह्नकालीनवर्णनमिदम् । छायाऽध्वगैः सह श्रान्तेव वृक्षमूलमाश्रयते । तडागजलीया शीतता तापक्लान्तेव मत्स्यैः सह तडागमूलप्रदेशं गच्छति । सूर्यदीधितिरपि जातिविशेषैस्तत्वं तप्तेव जनैः सार्द्धं जलमाचामति । क्लान्तेव निद्रापि युवतिजनैः सह गृहमध्यं प्रविशति । अत्र सहोक्तिरलङ्कारः । लक्षणं काव्यप्रकाशे—"सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् ॥" सहार्थबलादेकं द्वयोर्वाचकं सा सहोक्तिरलङ्कारः । एकस्मिन्नर्थेऽभिधायकं शब्दव्युत्पत्तिबलादेकार्थ एव स्वान्वयानुभावकमित्यर्थः । छायाकर्तृकं विटपितलकर्मकं संश्रयणं समानविभक्त्यन्तपदार्थयोः कर्त्रोस्त्यागकर्तृपदार्थयोश्चाभेदान्वयस्य व्युत्पत्तिसिद्धत्वाच्छाब्दम् । पान्थकर्तृकं तु संश्रयणमर्थात्सहार्थमाहात्म्यलभ्यमिति । एवं च "सहयुक्तेऽप्रधाने । २।३।१९ ॥" इति पाणिनीयसूत्रेण यत्र तृतीया तत्रायमलङ्कारस्तेन "शशिना च निशा निशया च शशी" इत्यादौ हेतुतृतीयेति नायं किन्त्वन्योन्यालङ्कार इति संक्षेपः । सर्वत्रैवं चातिश-

तोक्तिपूर्विकैवेति । " लक्ष्मणेन समं रामो ययौ " इत्यादौ सहभावात्ता-
ङ्कार इति दर्पणकृन्मतं साधु ॥

२८ विनोक्तिः ।

वदनं विना सुकवितां सदनं साध्वीं विना वनिताम् ।
राज्यं च विना धनितां न नितान्तं भाति कमनीयम् ॥
पङ्कैर्विना सरो भाति सदः खलजनैर्विना ।
कटुवर्णैर्विना काव्यं मानसं विषयैर्विना ॥
(रसगङ्गाधरः).

व्यक्तार्थं पद्यं । पूर्वोत्तरान्येन विनाऽन्योऽशोभनः पश्चार्धान्येन विनेतरः शोभन इति क्रमेणोदाहरणे बोद्धव्ये । लक्षणं काव्यप्रकाशे-" विनोक्तिः सा विनान्येन यत्रान्यः सन्न नेतरः ॥ " यत्रान्येन पदार्थेन विनाऽन्यः पदार्थो न सन्न शोभनस्तथाऽन्येन विनाऽन्य इतरोऽशोभनो न भवेच्छोभनो भवेत्तत्र विनोक्तिरलङ्कार । इयं विनाशब्दाभावेपि तत्समानार्थनञ्निर्व्यन्तरेणर्तेरहितविकलादिशब्दप्रयोगेपि भवति । अलंकारभाष्यकारस्तु " नित्यसम्बन्धानामसम्बन्धवचनं विनोक्तिः ॥ " इत्याह ॥

२९ परिवृत्तिः ।

दत्त्वा कटाक्षमेणाक्षी जग्राह हृदयं मम ।
मया तु हृदयं दत्त्वा गृहीतो मदनज्वरः ॥
(साहित्यदर्पणम्).

तस्य च प्रवयसो जटायुषः
स्वर्गिणः किमिव शोच्यतेऽधुना ।
येन जर्जरकलेवरव्यया-
त्क्रीतमिन्दुकिरणोज्ज्वलं यशः ॥

(कुवलयानन्दः).

कुरङ्गनयनया कटाक्षं समर्प्य मम हृदयं गृहीतं मया तु हृदयं समर्प्य कामज्वरो गृहीत इति विरहिण उक्तिः । पूर्वार्द्धे कटाक्षहृदययोस्तुल्यत्वात्समेन समस्य विनिमयरूपः परिवृत्त्यलङ्कारः । उत्तरार्द्धे तु मदनज्वरस्य निकृष्टत्वाद्धृदयस्य चोत्कृष्टत्वादुत्तमदानेनानुत्तमविनिमयरूपः सः ॥

इयं रामोक्तिर्वृद्धस्य सीताहरणवृत्तान्तनिवेदनानन्तरं मृतस्य स्वर्गगतस्य तस्य जटायुषः पक्षिणोऽधुना किं शोच्यम् ? न किमपीत्यर्थः । येन जटायुषा जीर्णशरीरदानेन चन्द्रकिरणवदुज्ज्वलं यशः क्रीतं गृहीतम् । अत्रानुत्तमवृद्धशरीरदानेनोत्तमयशसो विनिमयरूपः परिवृत्त्यलङ्कारः । लक्षणं काव्यप्रकाशे–" परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः ॥" समासमैस्तुल्यातुल्यैः पदार्थैः पदार्थानां विनिमयो दानादानरूपः स परिवृत्त्यलङ्कारः । विनिमयश्चात्र कविप्रतिभोत्थापित एव न तु वास्तवः । तेन वास्तवलौकिकक्रयविक्रयादौ नालंकार इति पण्डितराजः ॥

३० भाविकम् ।

अत्राञ्जनमभूदेवमीक्षे ते लोचने शुभे ।
आकृतिं ते प्रपश्यामि भविष्यद्भूषणैर्युताम् ॥

(इदं मम).

नायको नायिकां प्रति वक्ति । हे शुभे ! अञ्जनाभावेऽपि ते नेत्रे शोभाया दृश्यमानत्वादञ्जनवती पश्यामि । भाविभूषणयुतां च तवाकृतिं साक्षात्करोमि । अत्र पूर्वार्द्धे भूतस्योत्तरार्द्धे भाविनो दर्शनाद्भाविकालङ्कारः । "प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः ॥ तद्भाविकम् ।" इति काव्यप्रकाशोक्तलक्षणलक्षणार्थः स्पष्टः ॥



३१ काव्यलिङ्गम् ।

दृष्टोऽपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान ।
क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः ॥

नाभिह्रदैः परिगृहीतरयाणि निम्नैः
स्त्रीणां बृहज्जघनसेतुनिवारितानि ।
जग्मुर्जलानि जलमण्डुकवाद्यवल्गु-
वल्गद्घनस्तनतटस्खलितानि मन्दम् ॥

(शिशुपालवधम्).

स रैवतगिरिर्दुरारोहोऽपि श्रीकृष्णस्यापूर्वेणादृष्टपूर्वेण तुल्यं विस्मयं विस्तारयामासानिरन्तर्णामवान् । तथाहि यत्प्रतिक्षणं नवतामपूर्वत्वद्भाव-मुपैति तदवलोकनरसिकानामेव तत्त्वं रूपं रमणीयतायाः । अत्र श्रीकृष्णस्य विस्मयोत्पादे हेतुत्वेन रमणीयतालक्षणस्य वाक्यार्थस्य समर्थना-त्काव्यलिङ्गाख्योऽलंकारो वाक्यार्थहेतुकः ॥

मरकतोपमगमाने गीतां निरन्तरपरिवारितैर्भिस्तैर्दर्दुरैः प्रतिषिद्धवेगानि दृढैर्निबन्धनैः सेतुभिर्निवारितानि जलरूपमङ्कुचितविशेषेण सुन्दरं यथा स्यात्तथा चैरपिनैः स्तनतटे स्खलने गतानि गमितानि वा पार्वतीः पिकाबलानि मन्दगीषु । अत्र स्तनतटेषु स्खलितत्वार्थो नदीजलानां मन्द-गमने हेतुत्वो विशेषणगत्येत्वेन स्वार्थेऽनुक्त काव्यलिङ्गमेकमेकपदार्थहेतु-कमप्युक्तम् । तदुक्तं काव्यप्रकाशे—" काव्यलिङ्गं हेतोर्वाक्यपदा-र्थता ॥ " यत्र वाक्यार्थता हेतुः पदार्थता वा हेतुस्तत्र काव्यलिङ्गमलं-कारः । अयमेव काव्यहेतुरित्यलंकारश्चोच्यते । क्रियान्वयेन समाप्तं वाक्यमुच्यते । कारकपदं क्रियामाकाङ्क्षं तु पदम् ॥



३२ पर्यायोक्तम् ।

त्वां सुन्दरीनिवहनिष्ठुरधैर्यगर्व-
निर्वासनैकचतुरं समरे निरीक्ष्य ।
केषामरिक्षितिभृतां नवराज्यलक्ष्मीः
स्वामित्वतास्वमपरिस्खलितं बभार ॥

सूर्याचन्द्रमसौ यस्य वासो रञ्जयतः करैः ।
अङ्गरागं सृजत्यग्निस्तं वन्दे परमेश्वरम् ॥

(रसगङ्गाधर).

कश्चित्कविर्नृपं स्तौति । हे राजन् ! सुन्दरस्त्रीसमूहकठोरपीवरस्तनद्वयीकरणपण्डितं त्वां युद्धे वीक्ष्य केषां शत्रुनृपाणां नवराज्यलक्ष्मीरस्खलितं पातिव्रत्यं चचार ? न केषामपीति भावः । अत्र सर्वापि शत्रुराज्यलक्ष्मीस्त्वां भजतीति विवक्षितोऽर्थः स्खलितपातिव्रत्या जातेत्याकारेण निरूपितोऽतः पर्यायोक्तमलङ्कारः ॥

यस्य महेश्वरस्य वस्त्रं रविचन्द्रौ करै रञ्जयतोऽपि च यस्याङ्गरागं सृजति तं वन्दे शिवमित्यत्र गगनाम्बर इति ममाङ्गराग इति वक्तव्ये भङ्ग्यन्तरेण सूर्यचन्द्रकररञ्ज्यमानवस्त्रोऽग्निसृज्यमानाङ्गराग इत्याकारेण कथनात्पर्यायोक्तम् । लक्षणं तु काव्यप्रकाशे—“ पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः ॥ ” वाच्यवाचकभावसम्बन्धेन विना वैयञ्जनिकव्यापारेण यत्प्रकृतस्यार्थस्य भङ्ग्यन्तरेण प्रतिपादनात्तदर्थकं पर्यायोक्तमलङ्कारः । अत्र भङ्ग्यन्तराश्रयणं पर्यायोक्तस्य विच्छित्तिविशेषः ॥

नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं नृपोपायनदन्तिनां मदः ॥

(किरातार्जुनीयम्).

नाभिप्रभिन्नाम्बुरुहासनेन
संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः
संहृत्य लोकान्पुरुषोऽधिशेते ॥

(साहित्यदर्पणम्).

दुर्योधनप्रवृत्तिप्रकाशकस्य वनेचरस्य युधिष्ठिरं प्रति वचनमिदम् । अयुग्मच्छदस्य सप्तपर्णस्य गन्ध इव गन्धो यस्य स तथोक्तस्तादृशो यो नृपाणामुपायनान्युपहारभूता ये दन्तिनो गजास्तेषां मदः कर्ताऽनेकत्रियानां स्रावेण स्थानं पांसुपंक्तिकाय मदाम्बुनाऽऽर्द्रत्वं कर्दमभूतं तद्रूपत्वं पङ्किलत्वं नयति । नृपतेरुद्धिवर्णनम् । महासमृद्धिवर्णनेनोदात्तालङ्कारः ॥

समुद्रवर्णनमिदम् । नाभिप्रोद्भूतकमलासनेन प्रथमेन ब्रह्मणा स्तूयमानो युगान्तोचितयोगनिद्रो नारायणो लोकान्संहृत्य समुद्रमधिशेते । "अधिशीङ्स्थासां कर्म ।१।४।४६॥" इत्याधारस्य कर्मत्वम् । अत्र नारायणीये चरिते समुद्रस्य माहात्म्येऽङ्गमिति उदात्तालङ्कारः । लक्षणं काव्यप्रकाशे—"उदात्तं वस्तुनः सम्पन्महतां चोपलक्षणम् ॥" वस्तुनो वर्णनीयस्य समृद्धिवर्णनं महतां च चरिताङ्गत्वं इति द्विप्रकार उदात्तालङ्कारः ॥

३४ समुच्चयः ।

हंहो ! धीर समीर हन्त जननं ते चन्दनक्ष्माभृतो
दाक्षिण्यं जगदुत्तरं परिचयो गोदावरीवारिभिः ।
प्रत्यङ्गं दहसीह मे त्वमपि चेदुद्दामदावाग्निवन्-
मत्तोऽयं मलिनात्मको वनचरः किं वक्ष्यते कोकिलः॥

(साहित्यदर्पणम्).

जीवितं मृत्युना लीढं सम्पदः श्वासविभ्रमाः ।
रामाः क्षणप्रभारामाः शल्यान्येतानि देहिनाम् ॥
प्रादुर्भवति पयोदे कज्जलमलिनं बभूव नभः ।
रक्तं न पथिकहृदयं कपोलपाली मृगीदृशः पाण्डुः॥

(रसगङ्गाधरः).

मुदमन्दभुवामपां मयूराः
सहसायन्त नदी पपाट लाभे ।
अलिनाऽरमतालिनी शिलीन्ध्रे
सह सायन्तनदीपपाटलाभे ॥

(शिशुपालवधम्).

कटुपथ्य नवाहितेभ्यकस्मात्
सिनपङ्केरुहसोदरश्रि चक्षुः ।

पतितं च महीपतीन्द्र तेषां
वपुषि प्रस्फुटमापदां कटाक्षैः ॥

(साहित्यदर्पणम्).

विरही वदति हंहो इति सम्बोधनसूचकमव्ययम् । हे धीर वायो ! इत्यत्र खेदसूचकम् । तवोत्पत्तिर्मलयाचलात् । दाक्षिण्यं सारल्यं दक्षिणदिग्भवत्वं च जगति प्रधानं ख्यातं च । गोदावरीजलैः परिचय सङ्गः । एतादृशोऽपि चेत्त्वमुत्कृष्टदावानलवन्मे मत्यङ्गं दहसि तदा मत्तो मलिनवर्णो वनचरश्चायं कोकिलो मया किं वक्ष्यते ? न किमपि वक्तुं शक्यो मया । यदि त्वादृशानां महतामपि परपीडाकारित्वं किमु वक्तव्यं प्राकृतानामिति भावः । अत्र वायोर्दाहकत्वाभावे मलयाचलजन्मरूपे एककारणे सत्यपि दाक्षिण्यादिकारणोपादानात्सर्वेषां च कारणानामुपादेयत्वेन शोभनत्वात्सयोगे समुच्चयालंकारस्तथैवास्य पद्यस्य चतुर्थे पादे तु सत्त्वे मलत्वेनैव सिद्धे कारणान्तरोपादानात्कारणानां चाशोभनत्वात्सयोगे समुच्चयालंकार. ॥

अर्थो व्यक्तोऽत्रापि गीतिनादयः सामान्याद्रमणीया विशेषणमाहात्म्यात्सरमणीया दुःखजनका इति शत्यतुल्यत्वेन सदसद्योगे समुच्चयालंकारः ॥

व्यक्तः पद्माभिधेयोऽत्र मलिनत्वारक्तत्वपाण्डुत्वगुणानां समुच्चयो युगपन्मेघोदये भिन्नाधिकरणत्वेन गुणसमुच्चयः ॥

वर्षर्तुवर्णनम् । अम्बुमुखां मेघसमवानामपां अत्रानां लाभे सति सहसा मयूरा मुदमावन्नाऽऽलभन्त । नदी पयाद प्रावहत् । अङ्गना भ्रमरेण सह भृङ्गी सायन्तनदीपवत्ताम्रवर्णे शिलीन्ध्रे कन्दलीकुसुमेरमत । अत्र मयूरमोदमाहयापनेकर्तृकक्रियायौगपद्यात्समुच्चयो क्रियाभारः ॥

३४ समुच्चयः ।

हंहो ! धीर समीर हन्त जननं ते चन्दनक्ष्माभृतो
दाक्षिण्यं जगदुत्तरं परिचयो गोदावरीवारिभिः ।
प्रत्यङ्गं दहसीह मे त्वमपि चेदुद्दामदावाग्निवन्
मत्तोऽयं मलिनात्मको वनचरः किं वक्ष्यते कोकिलः ॥

(साहित्यदर्पणम्).

जीवितं मृत्युना लीढं सम्पदः श्वासविभ्रमाः ।
रामाः क्षणप्रभारामाः शल्यान्येतानि देहिनाम् ॥
प्रादुर्भवति पयोदे कज्जलमलिनं बभूव नभः ।
रक्तं च पथिकहृदयं कपोलपाली मृगीदृशः पाण्डुः ॥

(रसगङ्गाधरः).

मुदमन्दभुवामपां मयूराः
सहसायन्त नदी पपाट लाभे ।
अलिनाऽरमतालिनी शिलीन्ध्रे
सह सायन्तनदीपपाटलाभे ॥

(शिशुपालवधम्).

कलुषश्च तवाहितेष्वकस्मात्
सितपङ्केरुहसोदरश्रि चक्षुः ।

पतितं च महीपतीन्द्र तेषां
वपुषि प्रस्फुटमापदां कटाक्षैः ॥

(साहित्यदर्पणम्).

हिंही शब्दे हंहो इति सम्बोधनसूचकमव्ययम्। हे धीर वायो! चन्दनशैलोद्भवत्वम्। मलयोत्पत्तिर्दक्षिणवायुत्वात्। दाक्षिण्यं सारल्यं दक्षिणदिग्भवत्वं च जगति प्रधानं ख्यातं च। गोदावरीजलैः परिचय सङ्गः। एवंगुणोऽपि चेत्त्वमुत्कटदाहजनकत्वेन मत्प्रत्यङ्गं दहसि तदा मत्तो मलिनवर्णो वनचरजातेः कोकिलो यदा किं करिष्यति? न किमपि कर्तुं शक्यो मया। यदि त्वमेतादृशो महतामपि परपीडाकारित्वं किमु वक्तव्य प्राकृतानामिति भावः। अत्र वायोर्दाहकत्वाभावे मलयाचलजन्मरूपे एककारणे सत्यपि दाक्षिण्यादिकारणोपादानमेतेषां च कारणानामुपादेयत्वेन शोभनत्वात्सदसद्योगे समुच्चयालंकारमवेक्ष्य पद्यस्य चतुर्थे पादे दुःखदत्वे मलयेनैव सिद्धे कारणान्तरोपादानात्कारणानां चाशोभनत्वात्सद्योगे समुच्चयालंकारः ॥

अर्थो व्यक्तोऽयमपि मतिविभ्रमोऽयं स्वाभाव्याद्रमणीया विशेषणमाहात्म्यात्सकलगुणा दुःखजनका इति सत्त्वतुल्यत्वेन सदसद्योगे समुच्चयालंकारः ॥

व्यक्तः पद्यार्थः। अत्र मलिनताख्यत्वप्रादुर्भावगुणानां समुच्चयो युगपन्मेघोदये मिलितविक्रमणत्वेन गुणसमुच्चयः ॥

वर्षर्तुवर्णनम्। अम्बरभूमौ मेघसमूहानामपां जलानां लाभे सति सहसा मयूरा मुखरायन्ताऽनृत्यन्त। नदी पयःप्रावहत्। आर्द्रेण भ्रमरेण सह भूमौ धावन्नदीपयःपातादनन्तरं शिलीन्ध्रे कन्दलीकुसुमैरभवत्। अत्र मयूरमोदप्रसादनेककर्तृकक्रियायोगपद्यात्समुच्चयो निराधारः ॥

हे राजेन्द्र! श्वेतकमलसमशोभं तव यशुर्यद्वा कलुषीभूतं तैः शत्रुषु पतितमात्रतीनां कटाक्षैः । अत्र कालुष्यगुणस्यापत्कटाक्षपातक्रियया समुच्चयः । लक्षणं काव्यप्रकाशे—"तत्सिद्धिहेतावेकस्मिन्यत्रान्यत्तत्करं भवेत् ॥ समुच्चयोऽसौ स त्वन्यो युगपद्या गुणक्रिया ॥" तस्य प्रकृतस्य कार्यस्यैकस्मिन्साधके सत्यपि साधकान्तराणां कथनं समुच्चयस्तस्योऽलंकार एकप्रकारको द्वितीयस्तु यत्र गुणक्रियाणां यौगपद्यम् ॥



३५ पर्यायः ।

स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ॥
विसृष्टरागादधरान्निवर्तितः
स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः ॥

(कुमारसम्भवात्).

विसृष्टा... [illegible]
[illegible] ।

गुरुत्वां संयाने स्वदि मयि याते ममजनि
प्रयाणपूर्णांमार्ते नयनयुगमिन्दीवररुचः ॥

(अमरुशतकम्).

यत्रासीत्पीनस्तनो हारस्तेऽरविभूषणैः ।
निर्यान्ति तयोः स्थूलाः स्तनयोरश्रुबिन्दवः ॥

(साहित्यदर्पणम्)

अत्रैकस्यामर्थनां सर्वं इन्दवशिरम् । प्रथमे उदविन्दवो कमलः प्रथमतुषवस्त्वं वैरादसत्वैरिस्ते च तरवे तेन चित्त-प्रभावनःप्रसादवः सम्भव । तत्र चर्दवा मेषतन्तु एवं चित्ता यथा पदेशवीर्य अलिस्टिष्यो दैवे मत स्वैरितरै निरवेव सर्वेरीश-सम दपूरितमु तमर्थ प्रथा कवेन कवि प्रावानय वरिष्ठा इत्यर्थः । अत्र वेदमन्त्र विन्दुस्व गुण: वदाई. तत्सादवेशास्त्रो स्वयं निष इति पर्यायालङ्कार, प्रथम । अतिरात्रापु परिवर्तोऽहरस्तवैव व्यावस्थी । द्वितीयस्तुः पर्यायेव ॥

यथा याद्या स्ववच्छ्रवारागारदयोगलसितोलिप कानाहुरागेणाह-र्निशं युग्यमनुखात विर्वापि पे दर्शीगुरावर्ती सवेव वर्दिश अङ्कुरदी यसै-तार्था कर इत्योऽसमलाकानहुवा इत: । अवैक: परोऽनेकस्मिन्विषये वर्तमान का इत इति द्वितीयोऽलङ्कारः पर्यायः ॥

अन्यो वदने बाहि । विद्रुमदेशादद्यपर्यन्तिमर्थं ततः परिचया-र्थितुशूलतयमातं सहसू मर्मैतो पुढ्मिपुवि तादृशं कमलैवायासस्ता मेनपुरो गुरुजनसमूहे मयि गते मयदा स्तुना धूर्वितारं मार्ग स्वपदेव । अथताकाबूदवेशे गुरुजनमेवापरावावियमेतिविजन कविस्तानन्दनं प्रियं सहसा-

लोकितवत्या नायिकाया एकस्मिन्नेवाधिकरणे विशेषणीभूतानां स्विन्नि-त्वादीनां क्रमिकत्वेन वर्णनात्तृतीयः पर्यायालङ्कारः ॥

नृपस्तुतिर्व्यंकार्योऽत्रैकस्मिन्वस्तुनि स्तनरूपे हारस्याश्रुमलानां चापियत्वमरिवधूकर्तृकमिति चतुर्थः पर्यायालङ्कारः । काव्यप्रकाशे लक्षणं—" एकं क्रमेणानेकस्मिन्पर्यायोऽन्यस्ततोऽन्यथा ॥" एकं वस्तु क्रमेन अनेकस्मिन्नाधारे स्वयंभूतान्यकृतत्वेनाथवानेकमेकस्मिंस्तथैव वर्णितं पर्यायालङ्कारः ॥



३६ अनुमानम् ।

यत्र पतत्यबलानां दृष्टिर्निशिताः पतन्ति तत्र शराः ।
तच्चारोपितशरो धावत्यासां पुरः स्मरो मन्ये ॥

(साहित्यदर्पणम्).

अथ तासां कामिनीनां यत्र पुरुषे दृष्टिपातस्तस्मिन्निशिता उत्[illegible] शराः कामस्येति शेषः पतन्ति तेन हेतुना शायकेऽयं कामधा[illegible] [illegible] शरा येन तादृशो भूत्वा कामिनीनामग्रतो धावतीति । अत्र [illegible] [illegible] [illegible] कविप्रतिभोत्थापितत्वेन [illegible] [illegible] । तदुक्तं काव्यप्रकाशे—" अनुमानं तदुक्तं य-त्साध्यसाधनयोर्वचः ॥" प्रथमं साधनस्य हेतोस्ततश्च साध्यस्य वर्ण[illegible] [illegible] अनुमानालङ्कार इत्यर्थः । [illegible] [illegible] [illegible] । [illegible]

[illegible] ॥

—

६७ परिकरः।

उचितपरिणामरम्यं स्वादु सुगन्धि स्वयं करे पतितम्।
फलमुत्सृज्य तदानीं ताम्यसि मुग्धे मुधेदानीम्॥

([illegible]).

हे मुग्धे! विवेकशून्ये! तदा [illegible] परिणामादिविशेषणविशिष्टं फलं [illegible] । अत्र [illegible] विशेषणसम्पदित्याग- [illegible] परिकरालङ्कारः। काव्यप्रकाशे लक्षणम्—" विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु

सः ॥" साभिप्रायैर्विशेषणैरुक्ति स परिकरालङ्कारः । अत्र रुद्राचार्येण द्रव्यादयश्चत्वारो भेदाः कथिताः । यद्यपि निरर्थकविशेषणोपादानेऽपुष्टार्थतादोषात्साभिप्रायविशेषणोपादाने तद्दोषनिवृत्त्या पुष्टार्थत्वमात्रं तथापि बहूनां विशेषणानामेकनिष्ठत्वेन विच्छित्त्युत्पादादलङ्कारत्वम् ॥



३८ व्याजोक्तिः ।

कस्य वा न भवेद्रोषः प्रियायाः सव्रणेऽधरे ।
सभृङ्गं पद्ममाघ्रासीर्वारिताऽपि मयाऽधुना ॥

(कुवलयानन्दः).

उपपतिखण्डिताधरां नायिकां दृष्ट्वा तां प्रति तत्सख्या भण्यते दृष्टेऽधरे कस्य रोषो न भवेदतो न साध्वेतदिति यथार्थे वृत्तान्त उच्यमानेऽस्मात्संनायिकापरनायागमने सत्यवृत्तान्तगोपनायानानन्त्येव द्वितीयदेशव्याजेन सभृङ्गकमलाघ्राणे निषिद्धेपि मया कृत त्वया तदतोऽधरो व्रणी संवृत्त इति नायिकापरापगोपनकथनाव्याजोक्तिरलङ्कारः । लक्षणं काव्यप्रकाशे—" व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ॥ " गूढमपि वस्तुरूपं कथमपि प्रभिन्नं केनापि व्यपदेशेनापह्नुवीत तत्र व्याजोक्त्यलङ्कारः । इह प्रकृताप्रकृतोभयनिष्ठसाम्याभावेनापह्नुतेर्न गोचरः ॥



३९. परिसंख्या ।

किं तीर्थं हरिपादपद्मभजनं किं रत्नमच्छा मतिः
किं शास्त्रं श्रवणेन यस्य गलति द्वैतान्धकारोदयः ।

किं मित्रं मननीयवाक्यनिचयः सम्यग्विबोधः सखे
कः शत्रुर्ननु [illegible] दुर्वासनासञ्चयः ॥

किं मित्रमन्ते सुकृतं न लोकाः
किं ध्येयमीशस्य पदं न लोकाः ।
किं काम्यमव्याजसुखं न भोगाः
किं जल्पनीयं हरिनाम नान्यत् ॥

(रसगङ्गाधर).

बलमार्तभयोपशान्तये विदुषां सम्मतये बहुश्रुतम् ।
वसु तस्य न केवलं विभोर्गुणवत्तापि परप्रयोजनम् ॥
भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे ।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ॥

(साहित्यदर्पणम्).

प्रथमपद्ये [illegible] व्यपोह्याना-मितरेषां [illegible] प्रथमो भेदः । द्वितीयपद्ये प्रश्नपूर्वकमुत्तरप्रदानेऽपि [illegible] लोकादेः शाब्दव्यावृत्तिर्द्वितीयो भेदः [illegible] । तृतीयपद्ये [illegible] परिकल्पना [illegible] न केवलं धनं परो-पकारायैव [illegible] परोपकृतये न तु स्वार्थायेति तृतीयो व्यपोह्य-मानानां [illegible] प्रश्नाभावपूर्वकमुत्तरदानाच्च तृतीयो भेदः परिलक्ष्यते । चतुर्थपद्ये प्रश्नाभावेऽप्युत्तरं व्यपोह्यानां शाब्दत्वं चातो भेदस्तुरीयः [illegible] । [illegible] काव्यप्रकाशे—" किञ्चित्पृष्टमपृष्टं वा

कथितं यत्प्रकल्पने ॥ तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता ॥" किंचित्पृष्टमपृष्टं वा कथितं यत् तत्सदृशस्यान्यस्य व्यपोहाय हेतवे कल्पते सामर्थ्यवशाद्भवति तत्र परिसंख्यालंकारः । प्रश्नपूर्वकमप्रश्नपूर्वकं च कथनं भवत्युभयत्र प्रतीयमानता वाच्यत्वं च व्यपोह्यमानस्येति चत्वारो भेदाः ॥

~~~

४० कारणमाला।

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ॥

(किरातार्जुनीयम्).

[illegible] द्वितीयसर्गस्थस्य युधिष्ठिरं प्रत्युक्तिः । अविक्रमं पराक्रमरहितं विपदो दुःखान्यभिभवन्त्याक्रामन्ति । आपदुपेतं [illegible] रहयति त्यजति श्रीमत्ता भवतीति भावः [illegible] लघुता मानाभावादिरूपा नियताऽवश्यंभाविनी [illegible] नृपश्रियः [illegible] पदं स्थानं न भवति । [illegible] अत्र पूर्वस्य पूर्वस्य [illegible] कारणमालालंकारः । तदुक्तं काव्यप्रकाशे—" [illegible] पूर्वस्य पूर्वस्य [illegible] हेतुता ॥ तदा कारणमाला स्यात् । [illegible] पूर्वस्य पूर्वस्य पदार्थस्य यदा हेतुता कारणता [illegible] ॥
~~~

४१ अन्योन्यम् ।

रूपं यौवनलक्ष्म्या यौवनमपि रूपसम्पदा तस्याः ।
अन्योन्यमलङ्करणं विभाति शरदिन्दुसुन्दर्योः ॥

(काव्यालङ्कारः).

शारदचन्द्ररमणीयायास्तस्या नायिकाया रूपं यौवनश्रिया यौवनं च रूपलक्ष्म्या विभात्यतोऽन्योन्यमलंकारकरणम् । अत्रैकक्रियया परस्परशोभावत्तासम्पादनद्वारा जननोपचारादन्योन्याख्योऽलंकारः । उक्तञ्च काव्यप्रकाशे–" क्रियया तु परस्परम् ॥ वस्तुनोर्जननेऽन्योन्यम्–" परस्परमेकयैव क्रियया द्वयोर्वस्तुनोः शोभावत्तादिसम्पादनद्वारा जनने कारणत्वे सत्यन्योन्यालंकारः ॥



४२ उत्तरम् ।

वीक्षितुं न क्षमा श्वश्रूः स्वामी दूरतरं गतः ।
अहमेकाकिनी बाला तवेह वसतिः कुतः ॥

(साहित्यदर्पणम्).

किं स्वर्गादधिकसुखं बन्धुसुहृत्पण्डितैः समं लक्ष्मीः ।
सौराज्यमदुर्भिक्षं सत्काव्यकथारसास्वादः ॥

(काव्यालंकार.)

[illegible]

[illegible]

[illegible]

[illegible]

अनल्पासप्रदेशे सङ्गमः कदाऽनयोर्भावीति प्रष्टुमसमर्थं विटं दृष्ट्वा साक्षाद्वक्तुमक्षमा कापि विदग्धा कामिनी स्वहस्तस्थितं लीलाकमलं न्यमीलयत्। सूर्यास्तानन्तरं सङ्गमो भावीति कमलसंकोचरूपेणेङ्गितेन दर्शितम्। कुशाग्रबुद्धिवेद्यत्वात्सूक्ष्मालंकारः॥

कापि सखी स्वसख्याः कण्ठे कुंकुमं मुखक्षरत्स्वेदबिन्दुपातैर्नष्टप्रायं दृष्ट्वा विपरीतरतावुत्तानाया मुखगलितस्वेदबिन्दूना पृष्ठभागगमनसम्भवः कण्ठगतत्वं तु तेषां विपरीतरतित्वं गमयतीति पुरुषायितं सख्या ज्ञात्वा पुरुषोचितां तस्या हस्ते खड्गमासिमां कृतवतीत्याकारात्सूक्ष्मार्थज्ञानात्सूक्ष्मालङ्कारः। उक्तं काव्यप्रकाशे—"कुतोऽपि लक्षित सूक्ष्मोऽप्यर्थोन्यस्मै प्रकाश्यते॥ धर्मेण केनचिद्यत्र तत्सूक्ष्मं परिचक्षते॥" धर्मेणेङ्गितेनाकारेण वा स्पष्टमन्यत्॥



४४ सारः।

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥

(श्रीमद्भगवद्गीता).

विषयेभ्य इन्द्रियाणि पराणि तेभ्यो मनः परं तस्माद् बुद्धिः परा यश्च बुद्धेः परः स आत्मा एवं बुधा आहुः। अत्र पूर्वस्मादुत्तरस्योत्कर्षप्रतिपादनात्सारोऽलङ्कारः। उक्तं काव्यप्रकाशे—"उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः॥" श्लोकपर्यन्तेऽवधिः समाप्तिर्यस्यैतादृश उत्तरोत्तरपदार्थोत्कर्षसारास्योऽलङ्कारः। अत्र श्लोक उत्तरमीमांसाविषयत्वेन बहु वक्तव्यं

तथाप्यस्मत्कृते श्रीमद्भगवद्गीताया विस्तीर्णे गुर्जरव्याख्याने* तत्सपरिष्कार-मिति तत एवावधेयम् ॥



४५ समाधिः ।

विगतसस्यजिघत्समघट्टयत्
कलमगोपवधूर्न मृगव्रजम् ।
श्रुततदीरितकोमलगीतक-
ध्वनिमिषेऽनिमिषेक्षणमग्रतः ॥

(शिशुपालवधम्)

इषे आश्विनमासे कलमाः शालयस्तेषां गोप्त्री या गोपवधूः कर्त्री सा श्रुतो गोपवधूकृतो गीतकस्य ध्वनिर्येन तमत एवाग्रतो न निमिषत्यानन्दविस्मयाभ्यामित्यनिमिषमीक्षणं यस्य तं तदासक्तया च विगता घसु-

* श्रीमद्भगवद्गीताया गुर्जरव्याख्यानमस्मत्प्रणीतमतीव मतिमतां परमसमा-[illegible] । गुर्जरशिष्टैः [illegible] यथा[illegible] गुर्जरगिरा[illegible] गीताव्याख्याने [illegible] [illegible] । [illegible] [illegible] [illegible] प्रतिपादिताः सिद्धान्ता [illegible] [illegible] मुद्रितम् [illegible] ॥

गोविन्दरामजयदेवशास्त्रिमनियारकरशर्मा.

लिप्सा भिक्षा शालिभक्षणेच्छा यस्य तं मृगसमूहं नापहृत्यमाताडय-दित्यर्थः । शरद्वर्णनमिदम् । शालिक्षेत्रसंरक्षणकर्त्र्यो गोपवध्वो दण्डप्रहारा-दिना सस्यभक्षणार्थमागतान्मृगांस्ताडयन्तीति प्रसिद्धिः । अत्र तु दण्डसाध्ये मृगवारणे गोपवधूकृतगीतस्य काकतालीयन्यायेन सुसार्थस्य कारणत्वनि-रूपणात् समाधिरलङ्कारः । उक्तञ्च काव्यप्रकाशे—" समाधिः सुकरं कार्यं कारणान्तरयोगतः ॥ " उपात्तसाधनादवितर्कितोपस्थितेन साधना-न्तरेण यो योगस्तेन कार्यमारब्धं सौकर्येण सिध्येत्स समाधिनामालङ्कारः ॥



९६ असङ्गतिः ।

अहो खलभुजङ्गस्य विचित्रोऽयं वधक्रमः ।
अन्यस्य दशति श्रोत्रमन्यः प्राणैर्वियुज्यते ॥

(कुवलयानन्दः).

खलो नीचः स एव भुजङ्गः सर्पस्तस्य वधक्रमो जातिसर्पाद्विचित्रः । वैचित्र्यमेव वर्णयति । अन्यस्य पुरुषस्य श्रोत्रं दशत्यन्यश्च म्रियते । लोके यस्य सर्पदंशस्तस्यैव मरणं दृष्टमत्र तु दंशोऽन्यस्य मरणमन्यस्येति परकीयगोप्यवृत्तान्तकथनमन्यपरमरणोद्भावनाविच्छित्या वर्णितमित्यसङ्ग-तिरलङ्कारः । तदुक्तं काव्यप्रकाशे—" भिन्नदेशतयात्यन्तं कार्यकारण-भूतयोः ॥ युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसङ्गतिः ॥ " यत्र हेतुहे-तुमतोरपि धर्मयोः केनाप्यतिशयेनात्यन्तभिन्नदेशत्वेन युगपज्ज्ञानं साऽस-ङ्गतिरलङ्कारः । अत्र भिन्नाधिकरणविरोधिताऽसङ्गतेरेकाधिकरणविरोधिता-निष्ठविरोधालङ्कारस्य बाधः ॥



४७ समम्।

शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्याऽवतीर्णा।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः॥
(रघुवंशम्).

पक्कानां पिचुमन्दस्य फलानां भक्षणे व्यधात्।
वायसान् रसिकान्धाता योग्यसंयोगकृत्ततः॥
(इदं मम).

अजेन्दुमत्योः स्वयंवरे योग्यसमागमं स्तौति जनः। इयं कौमुदी मेघमुक्तं योग्यं शशिनं प्राप्ता। जह्नुकन्या गङ्गा स्वयोग्यं समुद्रं प्राप्तेति सदृशगुणवतोर्योगात्प्रीतिमन्तः पुरलोका अन्यनृपाणां श्रवणकट्वेकवाक्यमब्रुवन्। द्वितीयपद्ये परिपक्वनिम्बफलास्वादने काकानधिकारिणः कृतवांस्तस्माद्विधाता योग्यसमागमकर्त्रेति निर्विवादम्। अत्र प्रथमं सतोर्योग्यसमागमस्य तदनन्तरं चासतोर्योग्यसमागमस्य वर्णनात्समनामालङ्कारः। काव्यप्रकाशे लक्षणं—“समं योग्यतया योगो यदि सम्भावितः क्वचित्॥” यदि क्वचिदनयोरयं श्लाघ्य इति योग्यत्वेन द्वयोः सयोगः सम्भावितस्तत्र समाख्योऽलङ्कारः॥

४८ विषमम्।

रूपं क मधुरमेतत्क चेदमस्याः सुदारुणं व्यसनम्।
इति चिन्तयन्ति पथिकास्तव वैरिवधूं वने दृष्ट्वा॥
उत्कण्ठा परितापो रणरणकं जागरस्तनौ तनुता।
फलमिदमहो मयाप्तं सुखाय मृगलोचनां दृष्ट्वा॥
(काव्यालङ्कार).

अभीक्ष्णमुष्णैरपि तस्य सोष्मणः
सुरेन्द्रबन्दीश्वसितानिलैर्यथा।
सचन्दनाम्भःकणकोमलैस्तथा
वपुर्जलार्द्रापवनैर्न निर्ववौ॥
(शिशुपालवधम्).

तमालनीलो यस्यासिः शयं प्राप्य रणेऽद्भुतम्।
शारदेन्दूज्ज्वलं सूते यशस्त्रैलोक्यमण्डनम्॥
(इदं मम).

इन्दीवरनेत्रे त्वं वितरस्यानन्दमपरिमेयं मे।
त्वयैव जनितो विरहो दहति तनुं मे सदाऽतदर्हां वै॥
(इदं मम).

प्रथमपद्ये कश्चिन्नृपं स्तौति। तव शत्रुवधूं परिराज्यनाशेन वन-
चारिणीं दृष्ट्वा पथिका विचारं कुर्वन्ति यासुन्दरमेतद्रूपं क? क्वास्य

महादारुणमिदं व्यसनमिति । अत्र सुन्दररूपस्य दारुणव्यसनस्यात्यन्तवैधर्म्यादघटमानो योगो वर्णित इति प्रथमो विषमालङ्कारभेदः ॥

द्वितीयपद्ये सुखानुभवाय मृगनेत्रां स्वेष्टां कामिनीं दृष्ट्वोत्कण्ठादरं जाता अहो मया महत्फलं प्राप्तमिति कश्चित्कामी वदत्यत्र । सुखनिमित्तं कृतान्मृगलोचनादर्शनात्सुखप्राप्तिस्तु नैव जाता प्रत्युतोत्कण्ठापरितापरूपोऽनर्थो जाता इति कर्तुः क्रियाफलानवाप्तेरनर्थावाप्तेश्च द्वितीयो विषमालङ्कारभेदः ॥

तृतीयपद्ये सोष्मणः कामज्वरयुक्तस्य तस्य रावणस्य वपुः शरीरं भृशं शोकाद्दुष्प्रैर्देवेन्द्रस्य बन्दीकृता याः स्त्रियस्तासां श्वासमारुतैर्यथा निर्वृतं निर्वृतं तथा चन्दनोदकबिन्दुसहिताः कोमलाश्च ये जलार्द्रा जलोक्षिततालवृन्तानां पवनास्तैर्न निर्वृतम् । अत्र सन्तप्तस्योष्णोपचारैर्निर्वृतिरिति कारणविरुद्धकार्योत्पत्तिलक्षणस्तृतीयो विषमालङ्कारभेदः ॥

अथवा कारणगुणविरुद्धकार्यगुणोत्पादे इदमुदाहरणम् । कश्चिन्नृपं स्तुतो वक्ति । यस्य तमालवन्नीलः श्यामोऽसिः खड्गो युद्धे शारदचन्द्रवच्छुभ्रं जगद्व्यापकं यश उत्पादयतीत्यत्र कारणरूपखड्गो नीलगुणोऽपि कार्ये श्वेतगुणोत्पादक इत्ययमपि तृतीयो विषमालङ्कारभेदः ॥

हे हमदङ्गने ! त्वममन्दमानन्दं ददासि त्वयैव च जनितो विरहः पुनर्मम शरीरमत्यन्तं तापयति । अत्र नायिकाविरहयोर्जनकजन्ययोरानन्ददानतापक्रिये विरुद्धे इति चतुर्थो विषमालङ्कारभेदः । उक्तं काव्यप्रकाशे—"क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात् ॥ कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद्भवेत् ॥ गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये ॥ क्रमेण च विरुद्धे यत्स एष विषमो मतः ॥" कृष्णविरहव्यसनेन श्लेषो योगो दृष्टोऽप्युपपद्यमानतां न गच्छतीत्येकः । कर्तुः क्रियायां फलस्य तत्क्रियाफलं न सोऽप्यनर्थश्चेति द्वितीयः । का

यस्य गुणक्रियाभ्यामनुक्रमेण कारणस्य गुणक्रिये विरुद्धे इति तृतीयचतुर्थौ भेदावेवमेष चतूरूपो विषमालंकारो मतो विदुषाम् ॥



४९ अधिकम् ।

किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र ।
अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि ॥

(साहित्यदर्पणम्).

कल्पान्तकाले हि जगन्ति यत्रा-
तिष्ठन्नबाधं मधुसूदनस्य ।
तस्मिञ्शरीरे विबुधर्षिवर्या-
गमोपजाता न ममुः प्रमोदाः ॥

(इदं मम).

अस्य समुद्रस्य महिमानं महत्त्वं किं ब्रूमो वयम् ? । प्रलये यत्र कुक्षिनिक्षिप्तसर्वभुवनो हरिरज्ञात एव शेते । अत्राश्रितो हरिर्महानप्याधेयश्च वारिधिर्न्यूनोऽपि वारिधिप्रकर्षविवक्षया न्यूनस्यापि तस्याधिक्यवर्णनादधिकालङ्कारः प्रथमः ॥

द्वारवतीस्थितस्य श्रीकृष्णस्य नारददर्शनप्रस्तावे कल्पान्तसमये यत्र मधुसूदनशरीरे निर्बाधं यथा स्यात्तथा सर्वाणि जगन्ति अतिष्ठन् तत्र श्रीकृष्णशरीरे नारदागमनजाता आनन्दा न ममुः । अत्राप्याधारस्य श्रीकृष्णशरीरस्य महत्त्वेऽपि तत्तुल्यापादनपूर्वकं वैवक्षिकप्रमोदमहत्त्वस्य

वर्णनादाश्रिताधिक्येऽधिकालङ्कारः । उक्तञ्च काव्यप्रकाशे—" महतोर्य-न्महीयांसावाश्रिताश्रययोः क्रमात् ॥ आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्य-धिकं तु तत् ॥ " आश्रिताश्रययोराधेयाधारयोर्महतोः सतोरल्पदेहस्य तद्-अप्याधाराधेयौ वर्णनीयवस्तुप्रकर्षविवक्षया यथाक्रममधिकतरत्वं गच्छ-तस्तत्राधिकालंकारः ॥



५० प्रत्यनीकम् ।

मम रूपकीर्त्तिमहरद्भुवि य-
स्तदनुप्रविष्टहृदयेयमिति ।
त्वयि मत्सरादिव निरस्तदयः
सुतरां क्षिणोति खलु तां मदनः ॥

(कुवलयानन्दः).

वयस्यो नायकं वक्ति । त्वं कामादप्यधिकरूपो लोक इति का-रूपकीर्तिहर्त्तरि त्वयि द्वेषं धत्ते तथापि त्वत्पराभवं कर्तुमसमर्थः त्वद्धृदयां तां नायिकां निर्दयः सन् पीडयति । अत्र प्रतिपक्षभूतं नाय-निरासितुमसमर्थः कामस्तदाश्रिता नायिकां पीडयतीत्यतः प्रत्यनीकाख्योऽल-कारः । तदुक्तं काव्यप्रकाशे—" प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते ॥ " प्रतिपक्षं स्वन्यकृति-मपि साक्षान्निरसितुमसमर्थेन केनापि प्रतिपक्षोत्कर्षाय तदाश्रितस्य -स्यापि निरस्करणं प्रत्यनीकालंकार उच्यते । अनीकमतिनिभितुल्यत्व-त्प्रत्यनीकम् । अप्पयदीक्षितास्तु तत्सम्बन्धिबाधनापेक्षया साक्षाद्बाध-कैमुत्येन विशेषात् प्रतिपक्षबाधनेऽपीममलंकारमुशन्ति ॥

५१ मीलितम्।

अरमयन्भवनादचिरद्युतेः
  किल भयादपयातुमनिच्छवः।
